नान्यः कश्चिन्मत्तो व्यतिरिक्त इति ॥ सोनन्तरानन्तरं (so, all) प्राविशेत् ॥ सो ऽहं नित्यानित्यो ऽहं ॥ ब्रह्माहं ब्रह्माहं ॥ प्राञ्चः प्रत्यञ्चो ऽहं (प्रत्यञ्चाहं, 1, 2, 3) ॥ दक्षिणाग्निर्गार्हिपत्यश्चाहवनीयो ऽहं ॥ गुह्यो ऽहमरण्यो ऽहं ॥ ज्येष्ठो ऽहं श्रेष्ठो ऽहं वरिष्ठो ऽहं (5 adds: बलिष्ठो ऽहं) ॥ ऋगहं यजुरहं सामाहं (5 adds: अथर्वाहं) । अक्षरमहं पुष्करमहमग्रियं च ॥ अधश्चोर्ध्वं पुरस्ताज्ज्यो (ताज्यो, all) तिरिति ॥ अहमकः सर्वं च मां ॥ एवं (मां added by 1, 3, 4) यो मां वेत्ति स वेदान्वेत्ति साङ्गानिति ॥ ब्रह्मणा ब्राह्मण्यो ऽहं ॥ हविष्यं हविष्येण ॥ सत्यं सत्येन ॥ धर्मं धर्मेण ॥ तर्पयामि यत्स्वेन तेजसा ॥ अतो देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति ॥ यो वै रुद्रः स भगवान्यश्च ब्रह्मा तेभ्यो वै नमो नमः ॥

End:

गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति ॥ प्रणवानामयुतं जप्तं भवतीत्याह भगवानथर्वेशः (°नाथर्वेशाः, 3, 5) ॥ यो रुद्रो येन जगदूर्ध्वं पृथिवी च दृढाधृता ॥ येन यज्ञाः संस्थापिता (so 5; others: येन येन संस्थापयेत्) नागान्तरिक्षं (so, all) ॥ तस्मै रुद्राय नमो नमस्तस्मै रुद्राय नमो नमः (इति added by 4, 5) ॥ नमो (5 adds स्तु) रुद्राय सहस्रमूर्तये ॥ सहस्र (not in 1, 2, 4) पादाक्षिशिरोरुबाहवे ॥ (सहस्रनाम्ने पुरुषाय शाश्वते ॥ सहस्रकोटियुगधारिणे नमः ॥ only in 5) तस्मै रुद्राय नमो नमस्तस्मै रुद्राय नमो नम इति (no इति in 3) ॥ इत्यथर्वशीर्षं समाप्तं (so 4; इति शिवअथर्वशीर्षं समाप्तं, 3; अथर्वशिरं समाप्तं, 2; श्रीभवानीशङ्करमहारुद्रप्रीयतां, 1). No. 5 ends:... रुद्राय नमो नम इति ॥ य एवं वेदेत्युपनिषत् ॥ १६ ॥ ब्रह्माहं साङ्गानिति (so) नमस्तेभ्यो वै नमोनमः ॥ वरेण्यं परमं पदं तत्परं ब्रह्म मे वोधार्यं (so) माणमेवे (so) काक्षरं मानदाः(?)भस्मत्र्यायुषं भवत्यन्तरिक्षं पश्च ॥ इति शिवोपनिषत् ॥

B. Southern Recension.

8 copies, in Grantha (9, 11, 13, 15) Telugu (37, 48), and Devanāgarī (90, 117). In Nos. 2 and 5 the concluding section following **देवमेवानुप्रविशतीत्यों सत्यम्** is missing. The opening stanza of the Bombay edition is in No. 3 only.

(Dīpikā by Śaṅkarānanda, see Poona ed.).

Bhāṣya by Appayadīkṣita (117, Devanāgarī).

Begins :

यत्रोक्तस्त्रिषु सद्भावो रुद्रस्यान्तरदृष्टितः ।
ओंकारादेस्तथा व्याख्या यत्र सम्यक्प्रवर्तते ॥
तामथर्वशिरोऽभिख्यां श्रुतिं निर्गुणतत्पराम् ।
व्याख्यातुमुत्सुकस्सोहं स्मरामि श्रीगुरोः पदम् ॥

देवा इति देवाः विष्णुब्रह्मेन्द्रादयः **ह वा** इत्यनर्थकौ निपातौ **स्वर्गं** ब्रह्मस्वरूपं गमयतीति तं कैलासाख्यं **लोकं अगमन्** गतवन्तः । **त** उक्ता **देवाः रुद्रं** कैलासाधिपतिम**पृच्छन्** पृष्टवन्तः । अत्रायं भावः । विष्ण्वादयो देवाः स्वस्वार्वाचीनायात्मतत्त्वमवबोधयितुं स्वयमात्मविन्त्वेन शक्ता अपि गौरवात् सर्वोत्कृष्टस्य भगवतो महाकारुणिकस्य सर्वज्ञत्वाद्यशेषगुणसंपन्नस्य श्रीरुद्रस्य मुखारविन्दादवबोधयितुकामाः कैलासं जग्मुरिति । प्रश्नप्रकारमाह । **को भवानिति** हे भगवन् रुद्र भवान् कः **सगुणः** परमेश्वरो वा निर्गुणः परमात्मा वा ।

Ends :

तस्मा**त्समुत्थितः प्राणः** प्राणीत्यर्थ **तत्** अथर्वशिरः **अभिरक्षतु** अभितः अधीतिबोधाचरणप्रचारणैरवतु ॥ इदानीमवान्तरकार्यकारणीभूतयोरन्नमनसोः श्रीविद्यामोक्षबुद्ध्या अन्यविद्यामोक्षबुद्ध्या च रक्षणीयत्वमुक्त्वाथर्वशिर उपसंहरति **श्रियमिति**..............................

....

यस्य बन्धस्तस्य मोक्ष इति दर्शनं तु स्थूलदृष्टिविषयमेव बन्धो ऽन्य-

स्य मोक्षो ऽन्यस्येति दर्शनस्यैव सूक्ष्मदृष्टिविषयत्वात् । तथा हि । लोके चोरो बध्यते पश्चात्स एव मुच्यत इति स्थूलदर्शनं । अभुक्तचौर्यकर्मफलो बध्यते भुक्तचौर्यकर्मफलो मुच्यत इति सूक्ष्मदर्शनं । भुक्तफलाभुक्तफलयोर्ह्यन्योन्यविलक्षणतयान्यत्वमेव युज्यते । तस्मादनात्मनो बन्धः आत्मनो मोक्षश्चेत्यवगन्तव्यम् ॥ इति सुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ अथर्वशिरोपनिषद्भाष्यं समाप्तम् ॥

अद्वयतारकोपनिषद्

1 copy, Devanāgarī, with the *Bhāṣya of Appaya-dīkṣita* (118).

The Bhāṣya begins:

मूर्तामूर्तात्मकं यत्र तारकद्वयमुच्यते ।
ज्योतिर्दर्शनमार्गोक्तिं व्याख्यास्ये ऽद्वयतारकम् ॥

नतु **जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्मे**ति यदुक्तं तद्युक्तमेव । अपि तु **तत्सिद्ध्यै लक्ष्यत्रयानुसन्धानं कर्तव्यमि**त्येतदयुक्तं । कुतः ।.... अपरिच्छिन्नब्रह्मसिद्ध्यै त्वपरिच्छिन्नब्रह्मध्यानं कर्तव्यं ।....... सत्यमेवैतत् । तथाप्युक्तलक्ष्यत्रयानुसन्धानद्वारा.. परिच्छिन्नानुसन्धानविधानं युक्तमित्यवगन्तव्यम् ।

It ends:

नन्विह **तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति** इत्येतादृशवाक्यान्यर्थवादा एव स्युः । कुतः । **सहस्रारज्वलज्ज्योतिर्वे**त्यादि..................... । तस्मादत्रोक्तयोगि......प्रकृतवाक्यान्यर्थवादा एव । तथापि स्वदेहान्तर्वर्तिज्योतिर्दर्शनं विना तत्त्वमसीत्युपदिशतामहं ब्रह्मास्मीति वाङ्मात्रेण प्रलपताञ्च भ्रान्ततमानां

कल्पकोटिष्वपि संसारबन्धान्मोक्षासंभवान्मोक्षप्रथमसाधनत्वाच्चास्य दर्शनस्योपेक्षा न कदापि कार्येति स्थितम् ॥ इति सुन्दरेश्वरतात........ समाप्तम् ॥

अद्वैतोपनिषद्

1 copy, in Devanāgarī (86). It is so faulty that it can merely help us to recognize the character of the Upaniṣad unknown otherwise.

Beginning :

ओं अद्वैतपुरुषस्य न द्वितीयो भेदो स्ति स्थिरजङ्गमः मध्ये अद्वैतब्रह्मप्रकाशितं । सर्वलोकमध्ये ब्रह्मद्विधारूपं विचरति चैतन्यवितेजसः अन्तरात्मा मध्ये कैवल्यात्मामेकैकं । यथा रवितेजः रविर्भवेत् । तथा अखण्डितब्रह्म मायाजगत्रयं । अवस्थात्रयं परमात्मनः एकं भवति । या बुद्धिर्गर्भमध्ये सा बुद्धिर्बाल्यावस्था न भवति । या बुद्धिर्बाल्यावस्था भवति सा बुद्धिर्यौवनावस्था न भवति । या बुद्धिर्यौवनावस्था सा बुद्धिर्यूनावस्था न भवति ।

Middle :

...........चक्षुः प्राणमनोबुद्धिपञ्चेन्द्रिया पञ्चतत्त्वं.........तथा घटघटमध्ये बहुचन्द्रो पि दृश्यते...........कैवल्यं द्वैताद्वैतरहितं...... विष्णुवृक्षफलं उत्पन्नं परमहंसपूर्णो पि जायते । ज्ञानं माता विज्ञानं पिता सगुणब्रह्म निर्गुणब्रह्मार्पितं अष्टमी च निर्गुणावस्था ब्रह्मशरीरज्ञानलहरी ब्रह्मणो । ब्रह्मणो यज्ञोपवीतमनिष्टं ।...........

End :

अखण्डितं वस्तु मध्ये प्रविष्ट अर्धस्थाने अर्धसुर(?)स्थाने आत्मा दृश्यते । आत्मव्यापकं ब्रह्मज्ञानविज्ञानम् ॥ इत्यद्वैतोपनिषदं संपूर्ण ॥

अध्यात्मोपनिषद् (I)

1 copy, with the *Bhāṣya of Appayadīkṣita* (120, Devanāgarī).

The Bhāṣya begins:

ओमित्यक्षरमुच्चरन्नहमथो श्रीसुन्दरेशं गुरुम् ।
नत्वा पूर्णमदश्च शान्तिमिति तामेनां पठित्वा ततः ॥
अध्यात्मोपनिषद्वचांसि सुलभानन्दप्रदान्यादराद् ।
व्याख्यास्ये विदुषां हिताय परमात्मातः प्रसीदत्वयम् ॥
अध्यात्मविद्याधिगमाय लोके पठन्ति शास्त्राणि यजन्ति देवान् ।
अटन्ति तीर्थानि जपन्ति मन्त्रानेनां श्रुतिं तैरलमीक्षतुस्तु ॥

अत्र खल्वीशादिमुक्तिकान्ताष्टोत्तरशतोपनिषत्सु काश्चिदुपनिषदो गुरुशिष्यक्रममवलम्ब्य प्रवृत्ता दृश्यन्ते काश्चिदध्यात्मकुण्डिकाक्षुरिकाद्युपनिषदो गुरुशिष्यक्रमं विनैव स्वयं प्रवृत्ता दृश्यन्ते । कुतः । अन्तः शरीरे निहितो गुहायामित्यध्यात्मोपनिषदोपक्रम्यते । ब्रह्मचर्याश्रमे क्षीणे गुरुशुश्रूषणे रत इति कुण्डिकोपनिषदोपक्रम्यते । क्षुरिकां संप्र वक्ष्यामि धारणां योगसिद्धय इति क्षुरिकोपनिषदोपक्रम्यते । एवमपि सर्वासामुपनिषदां पौर्वापर्यालोचनया वा गुरुशिष्यक्रमेणैव प्रवृत्तत्वस्य वक्तव्यत्वादस्या अध्यात्मोपनिषदः पूर्विकायामक्षिकोपनिषदि साङ्कृतये शिष्याय भगवतादित्येन गुरुणोपदिश्यमानत्वादत्रापि तावेव गुरुशिष्यौ मन्तव्यौ । ननु एतां विद्यामवान्तरतमाय ददौ अवान्तरतमो ब्रह्मणे ददौ ब्रह्मा घोराङ्गिरसे ददौ घोराङ्गिरा रैक्काय ददौ रैक्को रामाय ददौ रामः सर्वेभ्यो भूतेभ्यो ददावित्येतदुपनिषदुपसंहारानुरोधेन गुरुशिष्यक्रमो भवितुमर्हतीति चेन्न तत्र विद्यासंप्रदायक्रमस्य विवक्षितत्वादुक्तपूर्वावादित्यसाङ्कृती एव गुरुशिष्याविति युक्तम् ।

अथेदानीमन्तःशरीर इत्याद्यारभ्येयमध्यात्मोपनिषद्व्याख्यास्यते ।
अन्तरिति । **अन्तःशरीरे** देहान्तर्विद्यमानायां **गुहायां** । गुहा-शब्दवाच्यहृदयपुण्डरीक इत्यर्थः । **निहितो** निक्षिप्तः ।

It ends:

वेदानुशासनमिति द्विर्वचनमुपनिषत्परिसमाप्त्यर्थम् । एवं क्रमेण मुमुक्षूणां मोक्षप्रयोजनसिद्ध्यै शब्दब्रह्मरूपेण भूमौ सञ्चरन्तीमेतामात्म-विद्याप्रतिपादनपटीयसीं सर्ववेदान्तसारभूतामध्यात्मोपनिषदं सव्याख्यां सद्गुरुमुखाच्छ्रुत्वा मननाद्यैः साधनविशेषैः सद्योमुक्तिं ये महान्तो ऽधि-गच्छन्ति त एव पुरुषोत्तमाः कृतकृत्याः सर्वलोकपूज्या भवन्तीत्यत्रैते ऽस्मच्छ्लोकाः ।

शब्दब्रह्मात्मना या जगति सुखकरी दुर्लभाध्यात्मविद्या
भात्येनां श्रद्धया ये परमगुरुमुखाद्दर्पणव्याख्यया ताम् ।
श्रुत्वा नित्यं तथान्यैर्मननमुखमहासाधनैर्यान्ति सद्यो-
मुक्तिं ते सर्वपूज्याः खलु पुरुषवरास्ते हि धन्या महान्तः ॥

There follow six more verses in different metres, and finally:

यदेतत्सर्ववेदान्तरहस्यार्थप्रकाशकम् ।
अध्यात्मदर्पणं लोके दुर्लभं ह्याश्रयेत्सुधीः ॥
सर्वशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।
अन्वेष्टव्यं प्रयत्नेन शास्त्रमेतन्मुमुक्षुणा ॥

इति श्रीसुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यविरचितमध्यात्म-दर्पणं समाप्तम् ॥

अध्यात्मोपनिषद् (II)

1 copy, in Devanāgarī (67).

Fourty-two *mukti-sthānāni* are enumerated here and located in certain parts of the body, e.g., Kāśī between the eye-brows, Prayāga in the top of the nose, the river Sarasvatī in the Suṣumnā, etc.

Begins:

श्रीगणेशाय नमः ॥

सप्तपुर्यस्त्रयो ग्रामा नवारण्या नवौखशः (so) ।
चतुर्दशैव गुह्यानि मुक्तिद्वाराणि भूतले ॥ १ ॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती ज्ञेया सप्तैता मोक्षदायकाः ॥ २ ॥

Ends:

एतेषां स्मृतिमात्रेण सर्वस्नानफलं भवेत् ॥
एतद्गुह्यं मया प्रोक्तं किमन्यद्वक्तुमिच्छसि ॥
क्षमातीर्थं तपस्तीर्थं तीर्थमिन्द्रियनिग्रहः ॥
सर्वभूतदयातीर्थं ध्यानतीर्थमनुत्तमं ॥
एतानि सर्वतीर्थानि सप्तषट्कानि देहिनां ॥
वसन्ति सर्वदेहेषु तेषु स्नानं समाचर ॥ ३२ ॥

इति **श्रीहिमवत्खण्डे नारायणनारदसंवादे ऽध्यात्मोपनिष**त्समाप्ता ॥

अन्नपूर्णोपनिषद्

1 copy, Devanāgarī, with the *Bhāṣya of Appaya-dīkṣita* (119).

The Bhāṣya begins:

मण्डव्याख्यमहामुनेरभिहिता मुक्तिर्विदेहोत्तमा
सर्वाश्चर्यकरी समाधिवशतो काले विरक्तेर्बलात् ।

यस्यां सर्वरहस्य तत्त्वविषया अर्थाः परे चोदिताः
व्याख्यास्ये महतीमिमां मृदुपदां तामन्नपूर्णां श्रुतिम् ॥ १ ॥

अत्र **निदाघाख्यो योगीन्द्रः ब्रह्मविदां वरं ऋभुं पप्रच्छे**त्युपक्रमः ।

It ends:

एतावता वरिष्ठपदप्राप्तिपर्यन्तेना**त्मयत्नेन** निर्विकल्पनिःसङ्कल्पनिवृत्तिकनिर्वासनसमाधिलक्षणेन **संसृतिर्निःशेषं** जिता **भवति** । एतदुपनिषदध्ययनात् ब्रह्मैव भवतीति ॥ इति सुन्दरेश्वर......समाप्तम् ॥

अमृतनादोपनिषद्

It has also the name **योगोपनिषद्** (rare), and in the North it is generally called **अमृतबिन्दूपनिषद्** .

A. Northern Recension.

5 copies: in Devanāgarī (77, 103, 109, 114) and Śāradā (59).

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Southern Recension.

7 copies: in Grantha (6, 13), Telugu (37, 39), Devanāgarī (93, 117), and Śāradā (60).

(Dīpikā by Śaṅkarānanda, see Poona ed.).

Bhāṣya by Appayadīkṣita Devanāgarī (117).

Begins:

यत्रायं योगशास्त्रार्थस्सङ्ग्रहेण निगद्यते ।
एनाममृतनादाख्यां व्याख्यास्ये श्रुतिमञ्जसा ॥

शास्त्राणीति ॥ **मेधावी** विवेकादिसाधनवद्बुद्धिमान् पुरुषः **पुनः पुनः** असकृ**च्छास्त्राणि** प्रकृतश्रुत्यादीनि योगशास्त्राण्यधीत्याभ्यस्य

तत्प्रतिपादितं **परमं** निर्गुणं ब्रह्म **विज्ञाय** स्वाभिन्नत्वेन सम्यग्विदित्वा**थ** **तानि** शब्दमयानि शास्त्राण्युत्**सृजेत्** परित्यजेत् शास्त्राभ्यासं न कुर्यादिति भावः । तत्र निदर्शनमाह । **उल्कावदिति** । यथोल्काहस्तो रात्रिचरस्सूर्योदयानन्तरमनुपयुक्तामुल्कां परित्यजेत्तद्वत् ।

Ends:

अरेफमक्षरमक्षं ज्ञानमित्यर्थः । तस्मा**ज्जातमक्षरं न क्षरते न** विनश्यति नित्यत्वात् (24) । सप्तत्रिंशत्पर्यन्ता श्लोकाः स्पष्टार्थाः । ब्रह्मरन्ध्रवायोर्न पुनर्जन्मेति ॥ इति सुन्दरेश्वर.........समाप्तम् ॥

अमृतबिन्दूपनिषद्.

See ब्रह्मबिन्दूपनिषद् and अमृतनादोपनिषद्.

अल्लोपनिषद्

This curious work, as is well known, has been composed to serve Akbar's idea of a world religion. In the South of India it is not recognized,* in spite of (or, perhaps, because of ?)† the widely spread opinion that the Mahomedans are skilled in the Atharvaveda, but in the North it is not only reckoned to the Atharvaveda, but actually recited by the Brahmins at the Vasantotsava or any occasion when selected texts of the four Vedas have to be read in the house of a

* Some years ago, a palm-leaf MS. of it was in the Adyar Library, but it was rejected by the then librarian.

† The Atharvaveda, excepting the Upaniṣads, is nearly unknown in Southern India.

Dvija. Of course, it is not admitted that Allah is the Mahomedan god, but the word is believed to be a synonym of Varuṇa.* The Upaniṣad is also said to be the standard work of a certain class of Sannyāsins. A very faulty text of it and of Netropaniṣad was published in Bombay (Kārtāntikapustakālaya), Śake 1826.

3 copies, in Devanāgarī (68, 73, 102), two of which are accentuated. No. 2 is in the Vedic *pāṭha* called *jaṭā*. It begins:

श्री गणेशाय नमः ॥ दिव्यानि धत्ते धत्ते दिव्यानि दिव्यानि धत्ते धत्ते इल्लले इल्लले धत्ते धत्ते इल्लले धत्ते इति धत्ते इल्लले वरुणो वरुण इल्लले, etc.

Allah, Varuṇa and Mitra play the main part in this Vedic-Mahomedan tintinnabulum the end of which (इलां इलामिलामिलामिलामिलां इला इलां, etc.; the other MSS. have अल्ला इल्लला, etc.) suggests the idea that the Vedic goddes Iḍā or Ilā was the bridge on which Allah was introduced here. Compare Bṛh. Up. VI, 4. 28: इलासि मैत्रावरुणी, and note that in the colophon of the printed text the work is called लक्ष्म्युपनिषद्.

अवधूतोपनिषद् (I)

Begins:

अथ ह साङ्कृतिर्भगवन्तमवधूतं दत्तात्रेयं परिसमेत्य पप्रच्छ.
This is the work belonging to the 108 Upaniṣads and described in the Catalogue of the Government Oriental

* The Varuṇopaniṣad mentioned by Aufrecht has, however, nothing to do with our text. It is, as should be expected, the Vāruṇyupaniṣad = Taittirīyopaniṣad II and III.

Manuscripts Library, Madras (Vol. I, 3, p. 286–287 : **अथ हंसाकृतिर्भगवन्तमवधूतं**, etc.,)

2 copies, in Devanāgarī (105, 119).

Bhāṣya by Appayadīkṣita (119, Devanāgarī).

Begins :

स्वेच्छाचारो ऽवधूतस्य निर्दिष्टो यत्र कथ्यते ।
अवधूतोपनिषदं व्याख्यास्ये सहजस्थितिम् ॥

अत्र **दत्तात्रेयसाङ्कृति**संवादात्मिकायामवधूतोपनिषद्य**तिवर्णाश्रमी योग्येवावधूत** इत्युक्तम् ॥

Ends :

तस्माद्प्राप्तस्य प्राप्तव्यस्य प्राप्तिरेव सर्वशास्त्रयुक्त्यनुभवानुरोधिनीति मन्तव्यम् ॥ इति मुन्दरेश्वर... ...समाप्तम् ॥

अवधूतोपनिषद् (II)

A poetical definition of the eight Yogāṅgas.

2 copies, in Devanāgarī (68, 116).

Begins :

ओं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगः ।
देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः ॥

Ends :

निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते
योगी कैवल्यमश्नुत इति य एवं वेदेत्युपनिषत् ॥

इत्यवधूतोपनिषत्समाप्ता ॥ (श्रीयोगदिगम्बरार्पणमस्तु, 2) ॥

अत्र केवलं ज्योतिरूपमित्यादिविशेषणवद्यदानन्दमयमासीदित्युक्तं तत्सच्चिदानन्दलक्षणसप्रतियोगिकब्रह्मैव भवितुमर्हति न निष्प्रतियोगिकं सर्वलक्षणवर्जितत्वेन सर्वशब्ददूरत्वात् ।

It ends:

प्रजापतिब्रह्मणोर्वा कार्यकारणत्वाद्भेदो ऽस्ति । यद्वापरस्य निर्विशेषब्रह्मण एव सकाशात्स्वयम्भुवोत्पादकविस्फुलिङ्गोदाहरणेन जीवब्रह्मणोरिव ब्रह्मब्रह्मणोश्चांशांशिभावस्य सुप्रसिद्धत्वादस्य नृसिंहजन्यत्वं गौणमेव मन्तव्यम् ॥ इति सुन्दरेश्वर. . . समाप्तम् ॥

आचमनोपनिषद्

1 copy, in Grantha (11). Incorrect.

श्रीगुरुभ्यो नमः । आचमनविधिं व्याख्यास्यामः । जङ्घे पाणिपादौ प्रक्षाल्य प्राङ्मुखोदङ्मुखो वा बद्धशिखयज्ञोपवीतब्राह्मणस्य दक्षिणे हस्ते पञ्चतीर्थानि भवन्ति अङ्गुल्यग्रे देवतीर्थं कनिष्ठिकामूले आर्षिकं तीर्थं आदेशिनि मूले पैतृकं तीर्थं अङ्गुष्ठमूले ब्रह्मतीर्थं मध्ये ऽग्नितीर्थं । न तिष्ठन्न हसन् न बुद्बुदैर्न च लोमैः । गोकर्णाकृतिवत्कृत्वा माषमग्नजलं पिबेत् । तेन त्रिराचमेत् । प्रथमं यः पिबेदृग्वेदः प्रीणातु । द्वितीयं यः पिबेद्यजुर्वेदः प्रीणातु । तृतीयं यः पिबेत्सामवेदः प्रीणातु । लोमाधरोष्ठम(!) थर्ववेदः प्रीणातु । मुखमग्नि तृप्तं (!) । सर्वं प्रोक्षति । यः पादौ प्रोक्षति यः चक्षुषी यः चन्द्रमादित्यौ यन्नोभिन्देन(!)पृथिवी यस्ततस्तेन विष्णुः । यच्छिरस्तेन रुद्रः । मूर्ध्नि शतकुबेरः सर्वदेवत्यास्ते प्रीणातु(!) य एवं वेद । इत्युपनिषत् ॥ इत्याचमनोपनिषत्समाप्ता ॥

आत्मपूजोपनिषद्

1 copy, in the Telugu character (50)*.

आत्मपूजोपनिषत् ॥ ओं । निश्चिन्तनं ध्यानम् । सर्वकर्मनिराकरणमावाहनम् । निश्चलज्ञानमासनम् । समुन्मनीभावः पाद्यम् । सदामनस्कमर्घ्यम् । सदादीप्तिराचमनीयम् । वराकृत (so) प्राप्तिः स्नानम् । सर्वात्मकत्वं दृश्यविलयो गन्धः । दृगविशिष्टात्मानक्षताः(!) । चिदादीप्तिः पुष्पम् । सूर्यात्मकत्वं दीपः । परिपूर्णचन्द्रामृतरसैकीकरणं नैवेद्यम् । निश्चलत्वं प्रदक्षिणम् । सोऽहंभावो नमस्कारः । परमेश्वरस्तुतिर्मौनम् । सदासन्तोषो विसर्जनम् । एवं परिपूर्णराजयोगिनः सर्वात्मकपूजोपचारः स्यात् । सर्वात्मकत्व (so) आत्माधारो भवति । सर्वनिरामयपरिपूर्णोऽहमस्तीति(!)मुमुक्षूणां मोक्षसिद्धिर्वदति(!) । इत्युपनिषत् ॥

आत्मबोधोपनिषद्

A. Northern Recension.

3 copies: in Devanagari (90, 103) and Śaradā (60). (Dīpikā by Nārāyaṇa, edited by Colonel Jacob).

B. Southern Recension.

It has some different readings, and 30 Ślokas are added to the prose.

2 copies: in Grantha (14) and Telugu (39). In No. 2 the Ślokas are missing.

* Called आत्मबोधोपनिषद् on cover and above, page 50.

आत्मोपनिषद्

A. Northern Recension.

8 copies: in Devanāgarī (87, 90, 102, 103, 109, 114). and Śāradā (59, 59).

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Southern Recension.

2 copies, in Devanāgarī (85, 119).

Apart from the various readings, this recension differs from the above by the addition of 29 Ślokas to the prose text.

Bhāṣya by Appayadīkṣita (Devanāgarī, 119).

Begins:

चत्वार उक्ता आत्मानो यस्यां सम्यग्विचारणे ।
एनामात्मोपनिषदं व्याख्यास्ये सारगर्भिताम् ॥

नन्वात्मान्तरात्मा परमात्मा चेति त्रय एवात्मान इहोच्यन्ते । कथं चत्वार इति । अत्रोच्यते । आत्मा हि त्वगाद्युक्तस्वरूपो देहः । अन्तरात्मा च पृथिव्याद्युक्तस्वरूपो जीवः । परमात्मा च यथाक्षर उपासनीय इत्युक्तस्वरूपः । वटकणिकाद्युक्ताकारः प्रत्यगात्मैव ।

Ends:

तथा चेह निष्प्रतियोगिकब्रह्मैव विवक्षितमिति सर्वद्वन्द्वापवादद्वारा परमार्थतां वदतोपसंहारश्लोकेन दर्शयति । तस्मादावृत्तेः सदसत्त्वाभ्यां बन्धमोक्षाविव बुद्धेः सदसत्त्वाभ्यामस्तिनास्तीति प्रत्ययेन तु नित्यस्येति युक्तमुक्तम् ॥ इति सुन्दरेश्वर..................समाप्तम् ॥

आथर्वणोपनिषद्

See मुण्डकोपनिषद्.

आदित्योपनिषद्

See सूर्योपनिषद्.

आरुणेयोपनिषद्

Called also आरुणेय्युपनिषद्, आरुण्युपनिषद्, आरुणिकोपनिषद्.

11 copies: in Grantha (7, 13), Telugu (37, 50), Devanāgarī (76, 103, 109, 114, 117), and Śāradā (59, 60).

(Dīpikās by Nārāyaṇa and Śaṅkarānanda, see Poona ed.).

Bhāṣya by Appayadīkṣita (Devanāgarī, 117).

Begins :

आरुण्युपनिषद्वाणीः कर्मत्यागैकगोचराः ।
व्याख्यास्ये सङ्ग्रहेणैव संसारार्तिनिवृत्तये ॥

आरुणिरिति । अरुणस्यापत्यं प्रजापतिसंबन्धी कदाचित्**प्रजापतेर्लोकं जगाम** ।

Ends :

एवं **निर्वाण**स्य नित्यशुद्धबुद्धमुक्तस्वभावपरब्रह्मात्मैक्यावस्थानलक्षणकैवल्यमोक्षस्या**नुशासनं** प्रतिष्ठापनमित्युपनिषत् ॥ इति सुन्दरेश्वर...... समाप्तम् ॥

आर्षेयोपनिषद्

This is one of the four Upaniṣads of the Oupnek'-hat (No. 47, called Arkhi) the Saṃskṛt text of which has been wanting as yet. It consists in a dialogue of the five Ṛṣis Viśvāmitra, Jamadagni, Bharadvāja, Gautama and Vasiṣṭha on the nature of Brahman.

1 copy, in Devanāgarī (93). Very faulty.

Begins :

ओं ऋषयो वै ब्रह्मोद्यमाहूयितवानूचुः (so) परस्परामिवानुब्रुवाणा-स्तेषां विश्वामित्रो विजितीयमिव (so) मन्यमान उवाच यदेतदंतरे द्यावापृथिवी अण(!)ष्णुवदिव सर्वमष्ण(!)वद्यदिदमाकाशमिवेतश्चेतश्च स्तनयन्ति विद्योतमाना इवावस्फूर्जमाना इव तद्ब्रह्मेति तस्योपव्याख्यानं यदिष्टमग्निभिर्ज्वलयान्ति पाप्लूययन्त्यद्भिरभिषियववन्ति वध्रौ(!)भिरभि-ग्रन्थंति वरत्राभिघ्नं(!)त्ययोघनैर्विध्यंति सूचीभिः निखानयन्ति शङ्कु-भिरभितृंदन्ति पट्टीशिकाभिर(!)भिलिपन्ति मृत्स्नया तक्ष्णुवंति वासीभिः कृष्णन्ति फालिभि (so) नैं हैव शकुवत(!)इति नास्येशीमहि नैनमती-यीमहि तद्ध ह जमदग्निर्नानुमेन(!)आर्तमिव, etc.

Ends :

सर्वस्य वशी सर्वस्येशानः सर्वमभिक्षिय(!)न्न तमश्नोति कश्चन परो-वरीयांसमभिप्रणुत्यमतर्जुषाणं (so) भुवनानि विश्वायमश्वं न कुशिका सो अग्निं वैश्वानरमृतजातंगमध्ययी भरे भरेषु नमु (so) पह्वयामप्रसा-सहिं (so) युध्ममिन्द्रं वरेण्यं सत्रासा(!)मवसे जनानां पुरुहूतमृग्मिनं विश्ववेदसं अहिघ्नं तमर्णवे शयानं वावृहाणं तवसा परेण तद्ध ह प्रति-पेदिरे ते वाभिवाद्यैवोपसमीयुः । नमो ऽग्नये नम इन्द्राय नमः प्रजापत-ये नमो ब्रह्मणे नमो ब्रह्मणे ॥ इत्यार्षेयोपनिषत्समाप्ता ॥

आश्रमोपनिषद्

3 copies, in Devanāgarī (103, 110, 114). Only the fourth chapter is known in the South, but in a different recension : see भिक्षुकोपनिषद्.

ईशावास्योपनिषद्

23 copies (Kāṇva recension) : in Grantha (10, 11, 13, 14, 15, 16, 17, 18, 18, 19, 28, 32, 35), Telugu (36, 37, 43, 45, 48), Nandināgarī (55), Śāradā (58, 60), Bengālī (62), and Devanāgarī (95).

Bhāṣya by Śaṅkarācārya.

6 copies : in Grantha (12, 12, 16, 35), Telugu (44), and Bengālī (62).

Bhāṣya by Ānandatīrtha.

1 copy : in Nandināgarī (55). Same as No. 317 of the Govt. Or. MSS. Library, Madras.

Prakāśikā by Śrīvatsāṅka (Kūranārāyaṇa).

This is according to the Viśiṣṭādvaita system.

1 copy : in Grantha (19).

Begins* :

विश्वं व्याप्यं धार्यं येन विचित्राश्शक्तयो यस्य ।
श्रीरङ्गेशं श्रीशं (°शं तमृषिं, ed.) तनुवाक्चित्तैरुपास्महे पुरुषम् ॥
सर्वेशानस्सर्वभूतान्तरात्मा ।
दोषानर्हस्सर्वविद्यैकवेद्यः ॥

---

* The readings added are those of the Grantha edition of 1870 (Vedāntavidyāvilāsa Press).

19

कर्माराध्यस्साध्यभक्त्येकलभ्यः ।
श्रीमान्व्यक्तो वाजिनां संहितान्ते ॥
यस्याचार्यैः कृतं भाष्यं गम्भीरं विदुषां मुदे ।
बालमोदाय तद्भावो यथाभाष्यं प्रकाश्यते ॥
ईशावास्यानुवाको ऽयं वाजिनां संहितान्तगः ।
शिष्याय गुरुणा यस्मिन्ब्रह्मविद्योपदिश्यते ॥
कर्मणां संहितोक्तानां विनियोगपृथक्त्वतः ।
विद्याङ्गतास्ति तद्व्यक्त्यै निबन्धोऽस्य तदन्ततः ॥

ईशावास्यमिदं सर्वं इत्येषो ऽनुवाको ऽष्टादशमन्त्रात्मकः । एते च मन्त्राः पुरुषसूक्तोदितपरमपुरुषतत्स्वरूपतदुपासनप्रपदनतत्प्राप्तिरूपत्वोपायपुरुषार्थानां सङ्ग्रहेण सम्यक्प्रतिपादित (°पादक, ed.) त्वात् । कर्मस्वविनियुक्तत्वाच्च (कर्मसु कल्पसूत्रकृताकात्यायनेनविनियुक्तत्वाच्च, ed.) । उपनिषत्सारभूताः भगवद्गीतादिभिश्चैतेषां नृणामुपब्रह्मणं (! मन्त्राणामुपबृंहणं, ed.) तत्र तत्र परस्तात्प्रदर्शयिष्यते ।

Ends :

तत्र चरमश्लोकस्य पूर्वार्धं **वायुरनिलममृतमिति** मन्त्रोक्तानुष्ठानविधायकं । उत्तरार्धं तु **युयोध्यस्मज्जुहुराणमेन** इति प्रार्थयमानानां प्रार्थनपूरणसङ्कल्पपूर्वकं शोकप्रतिक्षेपकमिति चरमश्लोको ऽप्यस्य मन्त्रद्विकस्योपबृंहणमेवेति सिद्धं । एवं परतत्त्वतद्विभूतियोगतदुपासनतत्प्रपदनतत्फलविशेषान् संगृह्य संहितेयं संपूर्यते ॥

वेदान्तगुरुपादाब्जध्याननिर्मलचेतसा ।
वाजिवेदान्तसारार्थः श्रीवत्साङ्केन निर्मितः (दर्शितः, ed.) ।
यदि रहस्यं विवृतं यद्वा न्यूनं वचोधिकं च ।
कृपया तदिदं सर्वं देवः क्षमेत तथा महान्तो ऽपि ॥

(Ed. adds : इति श्रीमत्सर्वतन्त्रोभयवेदान्ताचार्यपरमहंसपरिव्राज-

काचार्यस्य श्रीवत्साङ्कश्रीमन्नारायणमुनीन्द्रस्य कृतिषु ईशावास्यप्रकाशिका संपूर्णा ॥)

There is a connection between this work and the Bhāṣya by Vedāntadeśika (Govt. Or. MSS. Library, Madras, Cat. I, 3, p. 308).

Bhāṣya by Appayadīkṣita.

1 copy : in Grantha (11).

Begins :

सुन्दरं सुन्दराचार्यं प्रणम्य पुरुषोत्तमम् ।
ईशावास्याद्युपनिषद्भाष्यं त्वारभ्यते ऽधुना ॥

ईशावास्यमित्यादयो मन्त्राः प्रायेणाकर्मब्रह्मात्मैक्यावबोधनपरा अपि प्रतिपत्तिविधिशेषतयैव ब्रह्मात्मानमवगमयन्तीति गम्यते यत इह साधनचतुष्टस्य संपन्नाधिकारिविषये वेदान्तशास्त्रे पूर्वकाण्डप्रधानौ विधिप्रतिषेधौ वैलक्षण्येन वावगम्यते । तथा ह्याद्ये यतिविषये मन्त्रे **मा गृधः कस्यस्विद्धनमि**ति धनग्रहणप्रतिषेधः । द्वितीये गृहिविषये मन्त्रे **कुर्वन्नेवेह जिजीवषे**दिति नित्यकर्मकरणविधिः । एवंरूपयोर्विधिप्रतिषेधयोरत्रापि विद्यमानत्वान्न वेदवेदान्तयोरत्यन्तभेद इति शक्यते नियन्तुम् ।

Ends :

विश्वानि सर्वाणि हे **देव वयुनानि** कर्माणि ज्ञानानि च विद्वान् । किञ्च **युयोधि** वियोजय विनाशय **अस्मत्** अस्मत्तः **जुहुराणं** कुटिलं **एनः** पापं अस्मत्पापे विनष्टे सति वयं शुद्धास्सन्त इष्टं प्राप्स्याम इत्यभिप्रायः । यतो वयमिदानीं प्राणात्ययसङ्कटापन्नत्वेन नान्यांसपर्यांते (so) कर्तुं शक्नुमः । ततो **भूयिष्ठां** बहुप्रकारां **ते** तुभ्यं **नम उक्तिं** नमस्कारवचनं विधेम नमस्कारवचनेन केवलं त्वां परिचरेमेत्यर्थः ॥

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयशिवाचार्यकृतौ वाजसनेयिसंहितोपनिषद्भाष्यस्समाप्तः (so) ॥

उत्तरजाबालोपनिषद्

See under भस्मजाबालोपनिषद्.

उत्तरनारायणोपनिषद्

It consists of Anuvāka 13 (**नारायणं महाज्ञेयं** to **परमः स्वराट्**)+Anuvāka 38 (**ओं तद्ब्रह्म** to **स्वरोम्**) of the Āndhra recension of Mahānārāyaṇopaniṣad, to which is added the Mantra **मनो वयं वैश्रवणाय कुर्महे... महाराजाय नमः** (Taitt. Ār. I, 31. 6) and the conclusion : **स्वस्त**(?)**साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्टिराज्यं महाराज्यं माधिगत्य**(!) **मयटे**(!)**ममन्तपययी**(!)**स्यातु**(!)**सार्वभौमः सार्वायुषां त्राता पराह्ना**(?) **पृथिविं**(!)**समुद्रपर्यंतायायेव राडिति ॥ इति उत्तरनारायणोपनिषत्संपूर्ण**(!) **॥**

ऊर्ध्वपुण्ड्रोपनिषद्

1 copy : in Grantha (22).Comp. Varāhopaniṣad(II).

Begins :

अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य सनत्कुमारः पप्रच्छ । अधीहि भगवा(!)नूर्ध्वपुण्ड्रविधिम् । किं द्रव्यं किं स्थानं का रेखा को मन्त्रः कः कर्ता किं फलमिति च । श्रीवराह उवाच ।

Ends :

केशवादिद्वादशनामभिः ब्रह्मचारी गृहस्थो यतिश्च सर्वेभ्यो दुःखेभ्यो मुक्तो भवति । सर्वेषु तीर्थेषु स्नातो भवति । सर्वैर्वेदैर्ज्ञातो भवति । अश्रोत्रियः श्रोत्रियो भवति । अनुपनीतो ऽप्युपनीतो भवति । आचक्षुः पङ्क्तिं पुनाति न च पुनरावर्तते न च पुनरावर्तत इत्याह भगवान्वराहरूपी । य एवं वेद । इत्युपनिषद् ॥

ऋग्वेदजाबालोपनिषद्

This is the same as **भस्मजाबालोपनिषद्** (II) **ऋग्वेदे भस्मजाबालोपनिषद्**), but the latter does not contain the first section (ca. 18 Granthas) of this copy.

1. copy : in Grantha (7)

Beginning :

जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच । भगवन्त्रिपुण्ड्रविधिमनुब्रूहीति । स होवाच याज्ञवल्क्यः । प्रमाणमस्य त्रिधा च (so) रेखा ललाटादाचक्षुषोराभ्रुवोरामूर्ध्नो मध्यतः ।

End of first section :

यस्य कस्यचिच्छरीरे यावन्तो रोमकूपास्तावन्तो लिङ्गानि भूत्वा तिष्ठन्त इति ब्राह्मणो वा क्षत्रियो वा तद्धारणादेव तच्छब्दस्वरूपं यस्य तस्याभ्यासेऽवतिष्ठेदिति वै याज्ञवल्क्यः ॥

Colophon : इति ऋग्वेदजाबालोपनिषत्समाप्ता ॥

एकाक्षरोपनिषद्

1 copy, with the *Bhāṣya of Appayadīkṣita* (Devanāgarī, 119).

The Bhāṣya begins:

> यत्नोंकारात्मकं प्रोक्तं ब्रह्मनामैकमक्षरं ।
> एकाक्षरोपनिषदं व्याख्यास्ये सर्वगर्भिताम् ॥

अक्षरे अविनाशिनि परस्मिन्ब्रह्मणि तन्नामधेयत्वेन **यदेकाक्षरमस्ति**। तत्प्रणवाख्यमक्षरं **चन्द्रे** ऽस्ति। सर्वगमप्यमृतस्यन्दित्वात्तन्निर्देशः। **सुषुम्नायां च** ब्रह्मनाड्यां **दृढी** सुस्थितस्स **एकः** एकवस्तुप्रतिपादकत्वात्।

It ends:

न च प्रणवस्य वर्णत्वे ऽप्यचेतनत्वं वाच्यं चेतनमप्यपरोक्षयितुं शक्तिमत्त्वात्। नापि केवलजप्यत्वं तस्यास्ति। अकारादिमात्राणां विभागे सति निष्कलपरब्रह्माभिन्नत्वेन ध्येयत्वसिद्धेः। तस्मादेकाक्षरप्रणवोपासनमेव वरमित्यवगन्तव्यम् ॥ इति सुन्दरेश्वर.. ...समाप्तम् ॥

ऐतरेयोपनिषद्

12 copies: in Grantha (10, 13, 15, 16, 19, 27, 32, 35), Telugu (39, 43, 48), and Devanāgarī (95).

Bhāṣya by Śankarācārya.

5 copies: in Grantha (16), Telugu (42, 44, 53), and Devanāgarī (35).

Bhāṣya by Ānandatīrtha.

1 copy: in Nandināgarī (55).

Bhāṣya by Appayadīkṣita.

1 copy: in Grantha (11).

Begins:

> अखण्डानन्दबोधाब्धिं नत्वा श्रीसुन्दरेश्वरम् ।
> ऐतरेयोपनिषदो भाष्यं विरचयाम्यहम् ॥

आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषादित्येव- माद्यायामस्यामुपनिषद्य**ंभो मरीचीर्**भिरिमाप (so) इत्यादिना जगदुत्पत्तिः यथाण्डं मुखाद्वाग्वाचो ऽग्निरित्यादिना संसारोत्पत्तिश्चावगम्येते । अत इदमाशङ्क्यते । किमिदमनयोर्जगत्संसारयोरग्रे प्रागुत्पत्तेः विद्यमान आत्मा सप्रतियोगिकः उत निष्प्रतियोगिकः आहोस्विदुभयात्मकः ।

Ends :

अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा-मृतस्समभवदमृतस्समभवदिति द्विर्वचनमुपनिषत्परिसमाप्तिद्योतनार्थम्। इति श्रीसुन्दरेश्वरतातपादशिष्याप्पयशिवाचार्यकृतौ ऐतरेयोपनिषद्भाष्य-स्समाप्तः (so) ॥

Aitareyopaniṣat-tātparya-nirṇaya by ?

The work seems to be based on Śankarācārya's above-mentioned Bhāṣya.

1 copy (fragment) : in Grantha (15).

Begins :

ऐतरेयोपनिषत्तात्पर्यनिर्णयः । पूर्वग्रन्थ अपरब्रह्मविज्ञानेन सह कर्म परिसमाप्तं । एतत्सत्यं ब्रह्म प्राणाख्यं एष एको देवः एतस्यैव प्राणस्य सर्वे देवा विभूतयः । एतस्य प्राणस्यात्मभावं गच्छन् देवता अप्येति इति देवतासायुज्यरूपफलोपसंहारात् केचित्तु देवताप्यय एव मोक्षः स च ज्ञानकर्म समुच्चयसाध्यः । अतः परन्नास्तीति प्रतिपन्नाः । तन्निरा-चिकीर्षया आत्मा वेत्यादि ग्रन्थारम्भः । अस्मिश्च ग्रन्थे निर्विशेषात्म-विज्ञानमेव कर्मासहितं विधित्सितं षड्विधलिङ्गैः निर्विशेषब्रह्माणि तात्पर्या-वधारणात् । नन्विदं प्रकरणं कथं केवलात्मविषयम् ।

Breaks off :

कुर्वन्नेवेह कर्माणि यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्ण-मासाभ्यां यजते तं यज्ञपात्रैर्दहन्तीत्यादिश्रुतिविरोधः । पारिव्राज्यादिवि-

धायकशास्त्रस्य व्युत्थाय भिक्षाचर्यं चरन्तीत्यस्यामज्ञानस्तुतिपरत्वं अनधिकृतार्थत्वं वेति चेन्न ।

कठरुद्रोपनिषद्, or कठोपनिषद्

This is the southern recension of **कण्ठश्रुत्युपनिषद्.** It does not contain sections 1 and 2 of the latter, but it ends with 42 instead of 5 Ślokas.

1 copy, with the *Bhāṣya of Appayadīkṣita* (Devanāgarī, 120).

Beginning of the Bhāṣya:

चैतन्यमेकमपि सप्तविधं यथोक्तं
सम्यग्विचार्य निरुपाधिकमाद्यमेकम् ।
ध्यायन्विमुक्तिफलमेति न संशयो ऽत्र-
त्येनां कठोपनिषदं विवृणोमि सार्धाम् ॥

नन्विह **सशिखान्केशान्निष्कृष्य पुत्रं दृष्ट्वा त्वं ब्रह्मेत्यादि** वदेत् ।

End:

स्वयं मृत्वा स्वयं भूत्वेत्यात्मनः परस्यावशिष्यमाणस्य जननमरणवचनं जीवजननमरणयोरपि स्वस्य साक्षित्वेन सर्वदावस्थानाभिप्रायं मन्तव्यम् ॥ इति सुन्दरेश्वर . समाप्तम् ॥

कठवल्ल्युपनिषद्

1 copy: in Grantha (28).

The title is evidently wrong. The text runs as follows:

यज्ञोपवीती कृतचक्रधारी यो ब्रह्मविदो मनीषा (so) हिरण्यमादाय स दर्शनं कृत्वा वह्निसंयुक्तं स्त्रीशूद्रादीनां बाह्वोर्धारयेत् । तस्माद्विरेखं(?)

भवति । येकी(!)पुत्रममाश्रितः । अग्निना वै होता चक्रं पाञ्चजन्यं द्विभुजौ धारयेत् । आत्मक्तनमाचरेत् । आचार्य सन्मुखं प्रपद्येत । सालोक्यसामीप्यसारूप्यसायुज्यं गच्छति । य एवं वेद इत्युपनिषत् । इत्यथर्वणशिरसि प्रोक्त श्रीभाष्योपयुक्त कठवल्ल्युपनिषत्समाप्ता ॥

कठोपनिषद्

See काठकोपनिषद् and कठरुद्रोपनिषद्.

कण्ठश्रुत्युपनिषद्

5 copies: in Śāradā (59) and Devanāgarī (85, 103, 109, 114).

Compare कठरुद्रोपनिषद्.

कलिसन्त[ा]रणोपनिषद्, or नामोपनिषद्

4 copies: in Devanāgarī (73, 75, 114, 118).

Bhāṣya by Appayadīkṣita (Devanāgarī, 118).

Begins:

यत्नोषायः कलिं तर्तुमुक्तः षोडशनामतः ।
नारायणस्य व्याख्यास्ये कलिसन्तरणश्रुतिम् ॥

द्वापरान्त इति ॥ **गां** भूमिं **पर्यटन्** सञ्चरन् **कलिं** दुष्टं कलियुगं **सन्तरेयं** सम्यक् तरणं कुर्यामिति ।

Ends:

सद्योमुक्त्यभिधानं तु परब्रह्मप्रकाशद्वारेणेत्यभिप्रायः ॥ इति सुन्दरेश्वर......समाप्तम् ॥

काठकोपनिषद्, or कठोपनिषद्

In the South the name **कठवल्ल्युपनिषद्** prevails.

24 copies: in Grantha (10, 13, 14, 15, 16, 16, 17, 18, 18, 25, 32, 35), Telugu (36, 37, 43, 43, 48), Śāradā (59), and Devanāgarī (87, 90, 95, 103, 109, 114).

Bhāṣya by Śaṅkarācārya (called also **काठकोपनिषद्विवरणम्**).

6 copies: in Grantha (12, 17, 35), Telugu (44). Bengālī (62), and Devanāgarī (116).

Bhāṣya by Ānandatīrtha.

1 copy: in Nandināgarī (55), same as No. 348 of the Government Oriental MSS. Library, Madras (vol. I, 3, p. 325).

Bhāṣya by Appayadīkṣita.

1 copy: in Grantha (11).

Beginning:

प्रणम्य करणैः श्रीमत्सुन्दरेश्वरसद्गुरुम् ।
काठकोपनिषद्वल्ल्योर्व्याख्यास्ये ग्रन्थसङ्ग्रहात् ॥

उशन् कामयमानः ह वै इति वृत्तार्थस्मरणार्थौ निपातौ वाजमन्नं तद्दानादिनिमित्तं श्रवो यशो यस्य स वाजश्रवाः रूढिशब्दो वा तस्यापत्यं **वाजश्रवसः** ।

Ends:

मा विद्विषावहै तत्तत्कालीनप्रश्नोत्तरोत्पन्नं विद्वेषणं मा करवावहै निरन्तरं मानुसरावहा इत्यर्थः । **शान्तिश्शान्तिश्शान्तिरिति** त्रिवचनं शिष्याचार्येश्वराणां चित्तगतसर्वकल्मषप्रशमनार्थमोमिति मङ्गलार्थमिति ॥

इति सुन्दरेश्वरतातपादशिष्याप्पयशिवाचार्यकृतौ कठवल्ल्युपनिषद्भाष्ये द्वितीयाध्यायस्य तृतीया वल्ली समाप्ता ॥

कात्यायनोपनिषद्

On the Ūrdhvapuṇḍra: the materials to be used for it, the way of fixing it on the forehead, and the merit of bearing it.

1 copy: in Devanāgarī (116).

Begins:

ओं अथ कात्यायनोपनिषत् ॥ अथ प्रणिपत्य कात्यायनो ब्रह्माण-मन्वयुङ्क्त । अधीहि भगवः (!) किं पवित्राणां पवित्रम् ।

Ends:

अयमूर्ध्वपुण्ड्रविधिः । एवं विदित्वा यो धारयति स सर्वकर्मार्हो (?) भवति । कायिकात्पूतो भवति । स विष्णुसायुज्यमाप्नोति । स विष्णु-सायुज्यमाप्नोति । य एवं वेदेत्युपनिषत् ॥

कामकलोपनिषद्

See त्रिपुरोपनिषद्.

कामराजकीलितोद्धारोपनिषद्

How to obtain the full enjoyment of sensual pleasures which is the way to liberation.

1 copy, in Devanāgarī (111).

Begins:

श्रीमहागणपतये नमः ॥ अथोवाच कामराजं तदुपासना कुशलं लभेत् श्रियं लभेत् गुर्वीं वाणीं लभेत् । सर्वयुवतीनां प्रियो भवेत् ।

प्रथमकाम (!) ततः शक्तिस्तदनु तुरीयंद्राविते परैतानि पञ्चाक्षराणि भवन्ति ।

Ends:

सदाकौलिको भवेत् । कुलाचारात्सर्वेद्धी(!)श्वरो भवेत् । एकाकी शक्तियुक्तो भवेत् । मादनं भुक्त्वा शक्तिभुग् । भवेत् । शक्तिचक्रं पूजयेत् । भोगेन मोक्षमाप्नुयात् शक्तिहर्षोत्पादनाच्छक्तिप्रीता भवतीति शिवं । अथ बकुलैरर्चयेत् रक्तपुष्पैरर्चयेद्विल्वपत्रैरर्चयेत्तदभावे जलैस्तदभावे मानसीभक्तिमाचरेदिति शिवं ॥ इत्यथर्वणशाखायां कामराजकीलितोद्धारोपनिषत्समाप्ता ॥

कालाग्निरुद्रोपनिषद् (I)

A. Northern Recension.

5 copies: in Śāradā (59), and Devanāgarī (103, 106, 109, 114).

(Dīpikā by Nārāyaṇa, see Jacob, Eleven Ātharvaṇa Upaniṣads).

B. Southern Recension.

(a) 4 copies, in Grantha (9. 11) and Telugu (37, 48) beginning immediately (like A) or with a Śānti (भद्रं. . . .दधातु; शुक्लाम्बरधरं . . . .शान्तये).

(b) 5 copies, in Grantha (15, 16), Telugu (44, 49), and Devanāgarī (117) beginning with (सहनाववतु etc., followed by) अथ कालाग्निरुद्रोपनिषदः संवर्तको ऽग्निर्ऋषिः अनुष्टुप् छन्दः (श्री)कालाग्निरुद्रो (विश्वरूपरुद्रो, 2, 4) देवता (श्रीकालाग्नि)-रुद्रप्रीत्यर्थे जपे विनियोगः (रुद्रप्रीत्यर्थे मम भस्मधारणार्थे

जपे विनियोगः, 2) । अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ । Comp. the ed. of the 108 Upaniṣads.

(c) 2 copies, in Devanāgari (86, 91), much like b, but with fuller quotations from the Mahānārāyaṇopaniṣad No. 2, besides being very faulty, is incomplete (begins: जलमिति भस्म). No. 1 ends in the following peculiar way: स सर्वतीर्थेषु स्नातो भवति । सर्वेषु वेदेषु ध्यातो भवति । स सर्वा(!)रुद्रमन्त्रजाप्यो(!)भवति । सर्वतत्त्वज्ञानवान् भवति । स सकलभोगकृद्भवति । शिवसायुज्यमाप्नोति । अयं मत्रंतुस्तु(!)नमः शिवायेति ठित्वा(!) ललाटे भस्मना त्रिपुंड्रं करोम्यहं । गले पृष्टे नमः । हृदये हव्यवाहनाय०। तन्मध्ये नाभौ स्कन्धाय०। दक्षनाभौ इन्द्राय०। तन्मध्ये आदित्याय०। तन्मणिबन्धे सामाय०। वामभुजे वामदेवाय०। तन्मध्ये प्रभञ्जनाय०। तन्मणिबन्धे वसवेभ्यो०। पृष्टे हयाय०। स्कन्धे शिवाय०। ब्रह्मरन्ध्रे ब्रह्मणे नमः । इति सर्वाङ्गे विभूतिं धारयेत् ॥ इति कालाग्निरुद्रोपनिषद्ं सम्पूर्णम् ॥

(d) 2 copies, in Telugu (36, 45), beginning as follows: अथ (अस्य, 1) कालाग्निरुद्रोपनिषदः (कालाग्निरुद्रप्रश्नमहामन्त्रस्य, 1) संवर्तको ऽग्निर्ऋषिः अनुष्टुप् छन्दः (omitted in 2) विश्वरूपी (not in 1) श्रीकालाग्निरुद्रो (०रुद्रः परमात्मा, 1) देवता ओं बीजं नमश्शक्तिः शिवायेति कीलकं श्रीकालाग्निरुद्रप्रीत्यर्थे मम भस्मधारणार्थे (मम समस्तपापक्षयार्थे भस्मधारणे, 2) जपे विनियोगः । षडक्षरेण षडङ्गन्यासः (ओं अङ्गुष्टाभ्यां नमः शि अना०नमः वं कनिष्ठि०नमः यं करतलकरपृष्टाभ्यां नमः एवं हृदयादिन्यासः, 2) । लोकत्रयेण दिग्बन्धः (भूर्भुवस्सुवरोमिति दिग्बन्धः, 2) । ध्यानं । ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमोनमः । अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ ।

No. 2 ends: न स पुनरावर्तते इत्याह भगवान्बोधायनः। यस्त्वेतद्यो ऽधीते सो ऽप्येवमेव भवतीत्यों सत्यम् ॥ सह नाववतु, etc.

(e) One copy, in Grantha (14), beginning

ब्रह्मज्ञानोपायतया यद्विभूतिः प्रकीर्तिता ।
तमहं कालाग्निरुद्रं भजतो स्वात्मदं भजे ॥

ओं सह नाववत्विति शान्तिः । अथ कालाग्निरुद्रोपनिषत्संवर्तको, etc. (same as b). Comp. the ed. of the 108 Upanisads.

Bhāṣya by Appayadīkṣita, (agrees with b).

1 copy, in Devanāgarī (117).

Begins:

माहात्म्यं भस्मनो यत्र प्रोच्यते क्रममुक्तये ।
कालाग्निरुद्रोपनिषद्भाष्यमारभ्यते ऽधुना ॥

अथेति मङ्गलार्थः शब्दः । **कालाग्निरुद्रोपनिषत्संवर्तक** इति यः प्रलयकालभवो ऽग्निस्तन्मयस्य रुद्रस्य जगत्संहर्तुर्योपनिषत्तस्याः **संवर्तकः** प्रवर्तको ऽग्निर्ऋषिः । स्पष्टमन्यत् । **अधीही**ति हे भगवन् कालाग्निरुद्र **त्रिपुण्ड्रविधिं** भस्मत्रिपुण्ड्रधारणस्य विधानं सतत्त्वं सप्रमाणमित्यर्थः । **अधीहि** ब्रूहि ।

Ends:

यस्त्वेतद्वाधीते सो ऽप्येवमेव भविष्यतीत्येतदनुपपन्नं । अध्ययनमात्रेण सायुज्यमुक्तिसिद्धौ भस्मधारणकर्माचरणस्यानावश्यकत्वापत्तेः। अत्रोच्यते । न हि भस्मधारणहीनस्योपनिषदध्ययनाधिकारो ऽस्ति । अतस्तत्कर्मावश्यकमेव । अर्थवादाभिप्रायेण त्वध्ययनस्य फलमुक्तं वाकारश्चैतमर्थमवगमयति । तस्मादनवद्यम् ॥ इति श्रीमत्सुन्दरेश्वर...... समाप्तम् ॥

कालाग्निरुद्रोपनिषद् (II)

(नन्दिकेश्वरपुराणे)

This is not another recension of the preceding work (Jacob, Eleven Ātharvaṇa Upaniṣads, p. 4), but a different work which has nothing in common with the former except the title and the subject, i.e., Tripuṇḍra-vidhi, and a few Mantras also met with in many other treatises of this kind. This Upaniṣad seems to be unknown in the South of India.

4 copies: in Devanāgarī (83, 88, 108, 112). No. 3 does not contain the first portion up to the end of the **मातृकान्यासः** and has some other peculiarities besides.

Begins:

श्रीगणेशाश नमः । ओं विष्णुर्विष्णुर्विष्णुः (इति, 2) आचाम्य। वाक् वाक् । (प्राण प्राण । added in 1) घ्राण (not in 1) घ्राण। चक्षुः चक्षुः । श्रोत्र श्रोत्र (श्रोत्रः श्रोत्रः, 4) (घ्राणश्चक्षुःश्रोत्रं, 1)। नाभिर्हृदये (°य, 4; नाभिहृदयं, 1) कण्ठे शिरसः (°सिः, 1)। शिखा बाहुभ्यां यशोबलं ।

अपवित्रः (°त्रो, 2; °त्रं, 1) पवित्रो वा सर्वावस्थां गतो पि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरं (°रः, 2, 4) शुचिः ।

ओं पुण्डरीकाक्षाय नमः ।

अपसर्पन्तु ते भूता ये भूता भुवि (भूमि, 2) संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।
ओं अङ्गुष्टाग्रे तु गोविन्दं (°न्दो, 1, 4) तर्जन्यां च महीधरं ।
मध्यमायां हृषीकेशमनामिकायां त्रिविक्रमं ।

कनिष्ठायां (॰ष्ठिकायां, 2) स्थितो विष्णु (कनिष्ट्यां रक्षितो विष्णुः, 4) करमध्ये तु माधवः (॰वं, 1; वामनः, 4) ।
एवं यस्तु स्मरे (करे, 2; करं, 4) न्यासं फलं कोटिगुणं भवत् ।

अकारो नाभौ (आकारात्मनि, 1) उकार (॰रं, 4; ओंकार, 2) हृदये मकार (रं, 4) मूर्ध्नि ... .
ओं धियो यो नः प्रचोदयादित्यस्त्राय फट् । इत्यङ्गन्यासः (इति न्यासः, 2; missing in 1) । ओं नमः शिवाय । ओं नमो भगवते रुद्राय । इति शरीरं न्यसेत् (इति शरीरन्यासः, 1) ।

ओंकारं मूर्ध्नि विन्यस्य (विन्यसेत्, 1) नकारं नासिके तथा । ....जानुनि शङ्करं तथा । इति मातृकान्यासः । *ओं प्राणायामसङ्कल्पः (ओं प्राणाय नमः । मम सङ्कल्प, 1) आत्मनो भाव सिद्ध्यर्थे (शुद्ध्यर्थे । ओं, 2; सिद्ध्यर्थे, 3; शुद्ध्यर्थं, 4) विभूतिधारणमहं करिष्ये । अथ ध्यानं । ओं शुद्धस्फटिकसङ्काशमेकवक्त्रां चतुर्भुजां । मृगटङ्कधरां देवीं वरदाभयशोभिनीं ॥ १ ॥
. . ... ध्यात्वा चैवविदां (so) भूतीं (2; भूमिं, 3; भूतिं, 4) धारयेत्पुलकाङ्गिभिः (2, 3; धारयेतुलकाङ्क्षितां, 4) (ध्यात्वा देवीं विभूतिं वै धारयेत्पुलकाङ्गभिः, 1) । इति विभूतिध्यानं (इति विभूतिधारणमन्त्रः, 2, 4)। † तीर्थे गत्वा पादौ हस्तौ प्रक्षाल्याचम्य...विधिवत्स्नानं समर्प्य सन्ध्यावन्दनं कुर्यात् । ओं मण्डूकाय (मण्डुकाय, 2, 4) नमः। ओं श्रीकालाग्निरुद्राय नमः । ओं कूर्माय नमः । ओं आधारशक्तये नमः । ...इत्यासनशुद्धिं कृत्वा...इत्यासनजपे विनियोगः । ओं आधारशक्त्यै नमः † । ओं भूर्भुवःस्वः । क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं... ...इति जपमन्त्रः ।

---

*Beginning of No. 3: श्रीगणेशाय नमः । अथ कालाग्निलिख्यते ओं प्राणायामसङ्कल्प । etc.

†This section is transposed in 3 to a later place

Ends :

तस्मात्सर्वं विसृज्यैव (विसृज्येय, 3; विसृज्गेव, 2; विसृज्येवं, 1)
भस्मस्नानं समाचरेत् ।
जलस्नानाद्विभूतिस्नानं (जलस्नानं विभूतिस्नानं, 2; जलस्नानाद्वि-
भूतिनां । स्नानं, 3)
कोटिकोटिगुणाधिकं ।
जलस्नानात्म (so) मलत्यागी
विभूतिस्नानात्सदा (°स्नानमदा, 3) शुचिः ।
मन्त्रस्नानं (°नात्, 4) हरेत्पापं (दहेत पापं, 1)
ज्ञानस्नानात्परं पदं ।
सर्वतीर्थेषु यत्पुण्यं
सर्वयज्ञेषु यत्फलं ।
तत्फलं समवाप्नोति
भस्मस्नानं न संशयः (भस्मस्नानं समाचरेत्, 1, 4) ।
भस्मस्नानात्परं तीर्थं
गङ्गास्नानं दिने दिने ।
भस्मरूपी शिवः साक्षात् (भस्मरूपं शिवा । साक्षात्, 2)
भस्म त्रैलोक्यपावनं ॥

The colophons following this are somewhat different :

1. इति श्रीनन्द(!)केश्वरपुराणोक्तं श्रीकालाग्निरुद्रोप ....(last pattra missing).

2. ओं विष्णुर्विष्णुर्विष्णुः । सो ऽहं भस्मस्त्वं(!)सर्वदातव्यं स्वयं उलटंति(!) भस्मस्त्वं फट् स्वाहा । इति श्रीनन्दिकेश्वरपुराणोक्तं श्रीकाला-ग्निरुद्रोपनिषत्संपूर्णम् ॥

3. ओं श्रीं ह्रीं विष्णु विष्णु विष्णु भस्मस्त्वरक्षसर्वदानय(!)श्रयं(!) उलटंती भस्मस्त्वं फट् स्वाहा ॥ इति श्रीनंदिकेश्वरपुराणोक्तं(!)कालाग्निरुद्रोपनिषत्संपूर्णः ॥

4. ओं विष्णुः ओं विष्णुः सो ऽहं भस्मस्त्वं (!) रक्षः स्त्वं (!) सर्व आत्म(!) उलटंति भस्मस्त्वं फट् स्वाहा ॥ इति श्रीनन्दिकेश्वरपुराणोक्तं श्रीकालाग्निरुद्रोपनिषत्संपूर्णम् ॥

कालिकोपनिषद्

See Rājendralālamitra's 'Notices of Sanskrit MSS.,' vol. VI (1882), p. 258.

5 copies, in Devanāgarī (67, 70, 84, 88, 89). Except in No. 3, the title is **आथर्वण (अथर्वणीये, अथर्वे) (सर्वे) सौभाग्यकाण्डे कालिकोपनिषत्.** No. 1 begins with **ओं श्रीकृष्णायै नमः,** No. 5 with **भद्रं कर्णेभिरिति शान्तिः.**

Compare Syāmopaniṣad.

कालिमेधादीक्षितोपनिषद्

On the marvellous metamorphoses produced in him who meditates on Kālī as *medhā-dīkṣitā.*

1 copy: in Devanāgarī (89).

Extract:

ओं नमः श्रीदक्षिणाकालिकायै नमः । अथाह वै देवानां पत्नीं भजे तस्योपासक (lacuna) न्यांगच्छन् । ओं अथैनां मेधादीक्षितरूपिणीं भावयेत् स शिवो भवेत् स कालिरूपो भवेत्.........ततः कामकलाकालीं परारूपिणीं जपेत् ततः चरणदीक्षारूपिणीं हंसकालीं यजेत्

रक्तशुक्लमिश्रनिर्वाणरूपिणीं यजेत् सर्वनिर्वाणदीक्षितो भवेत्. ....चित्परारूपो भवेत् चित्परात्परारूपो भवेत् चित्परात्परातीतारूपो भवेत्... . स ब्रह्मत्वं गच्छति मेधादीक्षां लभेत्... . विद्याराज्ञ (!) धिकारी तु षोढां जपेत् तुर्याषोढाधिकारी कामकलां जपेत् कामकलाधिकारी चरणरूपिणीं जपेत् हंसदीक्षितो भवेत्.........गुह्यकाल्यधिष्ठितो भवेत् ततो मेधां चरेत्......षट्चक्राणि निर्भिद्यत् तत(!) परागभुग् भवेत् परकायप्रवेशवान् वयस्थैर्यं चरेत् कामरूपत्वं गच्छति षष्ठिसिद्धीश्वरो भवेदिति शिवप्रोक्त वेदेत्यथर्वणीये सौभाग्यकांडे कालिमेधादीक्षितोपनिषच्चतुर्थ ॥

कुण्डिकोपनिषद्

1 copy, in Devanāgarī, with the *Bhāṣya of Appaya-dīkṣita* (119).

Beginning of the Bhāṣya:

चतुरो ब्रह्मचर्यादीनाश्रमान्गच्छतः क्रमात् ।
आत्मनिष्ठोच्यते यत्र व्याख्यास्ये कुण्डिकां श्रुतिम् ॥

वानप्रस्थाश्रमे **विहितैः कन्दमूलकैः स्वशरीरं** क्षुद्बाधां **समाप्याथे-** दशाहारैः कालक्षेपो ममाभूदहो कष्टमिति विचिन्त्य **पृथिव्यां नाश्रु पातयेत्** ।

End:

अयं तु **सदा मुनिः** मौनशीलः ब्रह्मैकमननशीलो वा भवति । तस्मान्न कथञ्चनास्य विधिप्रतिषेधाभावे ऽप्यगम्यागमनभक्ष्याभक्ष्यविभागशास्त्रोल्लङ्घनादिलोकशास्त्रविरुद्धाचारप्रसक्तिः ॥ इति सुन्दरेश्वर........समाप्तम् ॥

कृष्णोपनिषद्

A. Northern Recension.

1 copy: in Devanāgarī (78).

(Dīpikā by Nārāyaṇa, see Jacob, Eleven Ātharvaṇa Upaniṣads).

B. Southern Recension.

It adds a second Khaṇḍa in prose to the first Khaṇḍa which is not different from A except in the beginning.

2 copies: in Telugu (38) and Devanāgarī (118).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (118).

Begins:

कृष्णावतारे मां यूयं भूत्वालिङ्गथ गोपिकाः ।
इति श्रीरामवचनं श्रुत्वा संतुष्टमानसैः ॥
रुद्रादिमुनिभिर्यस्यां कृष्णतत्त्वं विशेषतः ।
प्रपञ्चते तां व्याख्यास्ये कृष्णोपनिषदं पराम् ॥

श्रीमहाविष्णुमिति महाविष्णवंशभूतं **सच्चिदानन्दलक्षणं सर्वाङ्गसुन्दर,** etc.

Ends:

स **देहबन्धात्स्थूलसूक्ष्मकारणाख्यदेहत्रयसंयोगाद्विमुच्यते** । विशेषेण सत्यत्वेन प्रातिभासिकत्वेन व्यावहारिकत्वेन च मोक्षं गच्छति । इत्युपनिषत् । इति द्वितीयः खण्डः ॥ इति श्रीमत्सुन्दरेश्वर....... समाप्तम् ॥

केनोपनिषद्

[केनेषितोपनिषद्, तलवकारोपनिषद्].

In one MS. (p. 60, Śāradā) it is called **ब्राह्मणोपनिषद्**. The fuller title **जैमिनिशाखायां केनो(तलवकारो)पनिषद्** occurs in three Telugu MSS. only.

22 copies: in Grantha (10, 13, 14, 15, 16, 17, 18, 32, 35), Telugu (36, 37, 43, 43, 45, 48), Śāradā (59, 60), and Devanāgarī (87, 95, 103, 109, 114).

Bhāṣya by Śaṅkarācārya.

2 complete copies, both in Grantha (12, 16); and 2 copies of the Pada-bhāṣya, in Grantha (35) and Telugu (44).

*Bhāṣya by Ānandatīrtha.**

1 copy: in Nandināgarī (55).

Bhāṣya by Appayadīkṣita.

1 Copy: in Grantha (11),

Begins:

नत्वा श्रीसुन्दराचार्यं पदवाक्यप्रमाणतः ।
केनोपनिषदो भाष्यं यथावद्रचयाम्यहम् ॥

केनेति सङ्कल्पविकल्पात्मकं **मनः केन प्रेषितं** सत् **इषित**मिष्टं विषयजातं **पतति** गच्छतीत्यर्थः । **केन** च **युक्तो** नियुक्तः **प्रथमः** मनसो ऽपि पूर्विकत्वेनाध्यात्मिकविकारेष्वादिमः **प्राणः प्रैति** स्वव्यापारं प्रतिगच्छति ॥

Ends:

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ऽज्येये प्रतितिष्ठतीत्युपसंहारे ऽनन्तप्रतिष्ठात्मकफलश्रवणादिति चन्न स्वर्गलोकप्राप्तेरभिधीयमानत्वात् । देवा ह वै स्वर्गलोकमगमन्निति श्रुत्यन्तरेण च स्वर्गशब्दः कैलासपरो ऽवगम्यते अनन्त्यज्यायस्त्वादिकं तु सगुणोपासकप्रापणीये पुण्यलोक उपचर्यत इत्युपपद्यते । आद्यस्य खण्डद्वयस्य निर्गुणब्रह्मविषयत्वं अनन्तरस्य खण्डद्वयस्य सगुणब्रह्मविषयत्वं चोपक्र-

* For extracts see No. 393 of the Government Oriental MSS. Library, Madras (vol. I, 3, p. 347).

मोपसंहारादिलिङ्गैः स्पष्टमवगम्यत इत्यतो ऽभ्युदयमात्रप्रयोजनोत्तरखण्ड-द्वयव्याख्यानेष्वप्रवृत्तिरिति चावगन्तव्यम् । इति श्रीसुन्दरेश्वरतातपाद-शिष्याप्पयशिवाचार्यकृतौ तलवकारोपनिषद्भाष्यस्समाप्तः ॥

कैवल्योपनिषद्

25 copies: in Grantha (5, 9, 13, 15, 18, 31), Telugu (37 38, 48, 50), Śāradā (60), Bengālī (62), and Devanāgarī (81, 83, 84, 91, 93, 95, 98, 98, 98, 103, 106, 110, 114, 117).

The prevailing Śānti is **भद्रं कर्णेभिः,** etc., in the North, **सह नाववतु,** etc., in the South. No. 17 begins: **श्रीगुरुभ्यो नमः । ओं नमो ब्रह्मादिभ्यो**(!)**शान्तिः ।**; No. 3 :

कैवल्योपनिषद्वेद्यं कैवल्यानन्दतुन्दिलं ।
कैवल्यगिरिजारामं स्वमात्रं कलयेन्वहम् ॥

Dīpikā by Rāmānanda (Śankarānanda).

1 copy, in Devanāgarī (79).

Colophon: इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभग-वत्पूज्यपादशिष्यश्रीरामानन्दविरचिता कैवल्योपनिषद्दीपिका समाप्ता ॥

Bhāṣya by Appayadīkṣita.

1 copy. in Devanāgarī (117).

Begins:

यत्र कैवल्यसिद्धिः स्याद्गरिष्ठब्रह्मविद्यया ।
कैवल्याख्योपनिषदं व्याख्यास्ये न्वर्थसंज्ञकाम् ॥

अथेति मङ्गलार्थः शब्दः । **आश्वलायनाख्यो** महर्षि**र्भगवन्तं** धर्मज्ञानवैराग्ययशः श्रीमन्तं **परमेष्ठिनं** ब्रह्माणं **परिसमेत्यो**पसङ्गम्यो वाच । कथमिति तदाह । हे **भगवन् ब्रह्मविद्वान् यया** ब्रह्मविद्यया

साधनेनाचिरात् सद्य एव **सर्वपापं** ब्रह्महत्यादिकमपि **व्यपोह्यापहाय परात्**सगुणब्रह्मणः **परमुत्कृष्टं पुरुषं** निर्गुणब्रह्म **उपैति** प्राप्नोति तां **सदा सद्भिर्विशुद्ध**सत्त्वगुणसंपन्नैः **सेव्यमानामभ्यस्यमानां वरिष्ठां** भूमविद्यामि*त्यर्थः ।

Ends :

एतत्कैवल्योपनिषदुक्तप्रकारेण सप्रतियोगिकपरमात्मज्ञानिनां करामलकवत् सद्य एव कैवल्यमुक्तिः सिध्यतीति भावः । **कैवल्यं फलमश्नुत** इत्यभ्यास उपनिषत्परिसमाप्तिद्योतनार्थः ॥ इति श्रीमत्सुन्दरेश्वर ....समाप्तम् ॥

कौलोपनिषद्

See Govt. Or. MSS. Library, Madras, Vol. I, 3, p. 354. 6 copies : in Grantha (5, 34), Telugu (36), and Devanāgarī (90, 106, 106). Nos. 3 and 4 begin directly : **अथातो धर्मजिज्ञासा,** etc. On the cover of No. 5 there appears the title **मन्त्रोपनिषत्**.

Bhāṣya by Bhāskararāya.

1 copy : in Grantha (5).

Begins :

श्रीगुरुभ्यो नमः ॥ श्रीगुरुचरणाब्जकिरणविसरणनिर्धूतहृद्गतावरणभास्करराय: कौलोपनिषदाथर्वणीं विकासयति वक्ष्यमाणातिरहस्यार्थोपदेशे ऽवश्यंभाविविघ्ननिरासाय देवताः प्रार्थयते । **शन्नः कौलिकः शन्नो वारुणी शन्नः शुद्धिः शन्नो ऽग्निः शन्नः सर्वं समभवत्** । कुलमार्ग-

* *i.e.*, the "science of the Absolute," comp. Chānd. Up. VII.

प्रवर्तकः कौलिकः परशिवः विघ्ननिरामपूर्वकः स्वात्मानन्दप्रापको नो ऽस्माकं समभवत् भूयात् ।

Ends :

यश्चाचारविहीनो ऽपि यो वा पूजां न कुर्वते ।
यदि ज्येष्ठं न मन्येत नन्दते नन्दने वने ॥

पूर्वोक्ताचारान् नानुतिष्ठति संशयापन्नमनाः उक्तविधां सपर्यामपि न करोति वचनव्यत्ययच्छान्दसः अयं पन्था सर्वोत्तम इत्यपि न मन्यते एतादृशो ऽप्युपासकाभास उक्तफलालाभे ऽपि स्वर्गमात्रं लभत एव किमु तदुपासकस्य यथोक्तफलप्राप्तिरिति भावः ॥ कौलोपनिषद्भाष्यं समाप्तम् ॥

कौषीतक्युपनिषद्

6 copies : in Grantha (13), Telugu (37), and Devanāgarī (34, 80, 84, 117).

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins :

यस्यां मार्गद्वयं प्रोक्तं भोगमोक्षार्थकं नृणां ।
कौषीतक्यभिधामेनां व्याख्यास्ये विमलाशयाम् ॥

चित्राख्यः गर्गायणेः पुत्रः **यक्ष्यमाणः** यष्टुकामः, etc.

Ends :

द्रष्टृणां जीवात्मत्वाद्दृश्यस्य च परमात्मत्वाच्च व्यवहारदशायां तत्त्वं-पदार्थयोर्जीवब्रह्मणोर्भेदः परमार्थदशायां तयोरभेदश्च सुनिर्धारित इत्यव-गन्तव्यम् ॥ इति सुन्दरेश्वर........समाप्तम् ॥

क्षुरिकोपनिषद्

10 copies: in Grantha (14), Telugu (37), Śāradā (59, 60), and Devanāgarī (87, 93, 103, 108, 114, 117). No. 4 has the title **क्षुरिका नाम प्राणायामोपनिषद्**.

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins:

प्राणसन्धारणा मुख्या यस्यां संप्रोच्यते श्रुतौ ।
क्षुरिकोपनिषद्भाष्यं सभाष्यां कुर्महे ऽधुना ॥

यद्यपीह प्राणधारणाया एव प्राधान्येनाभिहितत्वात्क्रममुक्त्यर्थकतैवास्या उपनिषद्, etc.

Ends:

यद्यपीतरासां च नाडीनां पर्यवसाने ब्रह्मण्येव विलयो भवति तथापि तत्प्रकृतिभूतसंपत्तिद्वारा ताः विलीयन्ते सुषुम्ना तु ब्रह्माणि साक्षाद्विलीयत इत्यवगन्तव्यम् ॥

खिलसंहितोपनिषद्रहस्यपरिव्राजकोपनिषद्

See परिव्राजकोपनिषद्.

गणपत्युपनिषद्

It is also called **गणेशोपनिषद्**, and **विघ्नेश्वरोपनिषद्**, whereas in the North the most common name is **गणेशाथर्वशीर्षम्** or **(श्री)गणपत्यथर्वशीर्षम्**. It belongs to the **आथर्वशीर्षपञ्चकम्** (see Preface).

10 copies: in Grantha (5, 5, 9), and Devanāgarī (73, 82, 86, 94, 94, 106, 120). Nos. 1 and 3 end in the

following shorter way: स वाग्वी भवति । चतुर्थामनश्चजपाति । स विद्यावान्भवति । इत्यथर्वणवाक्यं ब्रह्मविद्याथर्वणविद्या । हरिः ओं सह नाववत्विति शान्तिः ॥ (no colophon). After the end of No. 7 there is a "Gaṇapati-dvādaśanāma" (गजानन, सुमुख, एकदन्त, कपिल, गजगणक, लम्बोदर, विकट, विघ्ननाश, धूम्रकेतु, गणाध्यक्ष, भालचन्द्र, गाणाधीप !)

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (120).

Begins:

यस्यां गणपतिः प्रोक्तः सगुणो निर्गुणो ऽपि च ।
एनां तु पश्यतां स्यातां सिद्धिमुक्ती न संशयः ॥
कथमेक एव गणपतिः सगुणो निर्गुणश्च भवेत् ।

Ends:

तस्मात्प्रतिमासन्निधावपि निष्कामजापका महा बुद्धयः सर्वविदः स्युरिति युक्तमेव श्रुतिवचनं मन्तव्यम् ॥ इति सुन्दरेश्वर.........समाप्तम्॥

गणेशपूर्वतापिन्युपनिषद्, or वरदपूर्वतापिन्युपनिषद्

2 copies, in Devanāgarī (35, 101).

गणेशोत्तरतापिन्युपनिषद्, or वरदोत्तरतापिन्युपनिषद्

2 copies, in Devanāgarī (85, 72).

गरुडोपनिषद्

See गारुडोपानिषद्.

गर्भोपनिषद्

The MSS. are not quite in harmony with each other, but it is doubtful whether we can speak of different recensions. Compare निरुक्तोपनिषद्.

18 copies : in Grantha (6, 13), Telugu (36, 37, 39, 48), Śāradā (59, 60), and Devanāgarī (76, 84, 87, 91, 93, 103, 108, 110, 114, 117). No. 8 has no other title but पैप्पलादं मोक्षशास्त्रम्. No. 10 has, after the end, the following poetical additions :

*कललस्त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
शोणितं दशरात्रेण पक्षेण चाण्डको भवेत् ॥ १ ॥
विंशद्रात्रे भवेन्मांसं पञ्चविंशे शिराङ्कुरम् ।
मासमेकं तु संपूर्णं पञ्चतत्त्वानि धारयेत् ॥ २ ॥

and :

शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ।
प्रमाता च प्रमाणं च प्रमेयं च तथा फलं ॥ १ ॥
इति सप्तविधं प्रोक्तं भिद्यते व्यवहारतः ।
मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते ॥ २ ॥
मायासम्बन्धतश्चेशो जीवो ऽविद्यावशास्तथा ।
अन्तःकरणसम्बन्धात्प्रमातेत्यभिधीयते ॥ ३ ॥
तथा तद्वृत्तिचैतन्यं प्रमाणमिति गीयते ।
तथा विषयचैतन्यं प्रमेयमभिधीयते ॥ ४ ॥
भग्नावरणचैतन्यं फलमित्यभिधीयते ॥

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

* Compare Aṅguttara-Nikāya X, 1, 3.

Begins:

अथ गर्भोपनिषदं देहोत्पत्त्यवबोधिनाम् ।
व्याख्यास्ये सङ्ग्रहेणैव वैराग्यस्य प्रसिद्धये ॥

पञ्चात्मकमिति । वक्ष्यमाणार्थं एष श्लोकः । **भवती**ति **पञ्चात्मक-मिति कस्मा**दित्याशङ्क्याह **पृथिवी**ति

Ends:

विषयवैराग्यवतो हि ब्रह्मज्ञानाधिकमनायाममुत्पद्यते अत इदं मोक्ष-शास्त्रमित्युपपन्नम् । इति गर्भोपानिषद्भाष्यं समाप्तम् । इत्यप्पयदीक्षिता-चार्यकृतौ गर्भोपनिषद्भाष्यं समाप्तम् ॥

गायत्र्युपनिषद् (I)

This is the same, apart from the end, as No. 446 of the Govt. Or. MSS. Library, Madras.

1 copy: in Devanāgarī (67).

Ends:

· शुद्धः पूतो ऽजरो ऽमृतस्सम्भवति । ओं गायत्र्युपनिषत् ॥ अस्य श्रीमृत्युञ्जयमन्त्रस्य चमसकहोल ऋषिः गायत्री छन्दः मृत्युञ्जयो महा-रुद्रो देवता ओं बीजं जुं शक्तिः सः कीलकं श्रीमृत्युञ्जयदेवताप्रसाद-सिद्धार्थे (so) जपे विनियोगः ॥

गायत्र्युपनिषद् (II)

This is hardly different from the MS. described by Rājendralālamitra under No. 2186 (vol. VI, p. 251), viz., *Gāyatrī-hṛdaya* which "apparently pretends to be an Upanishad." Compare Gāyatrīrahasyopaniṣad.

1 copy, in Devanāgarī (88).

Begins: (after two Ślokas on *prāṇāyāma*):

ओं ऋषय ऊचुः । नमस्कृत्य भगवान् याज्ञवल्क्यमुनिः स्वयंभु परिपृच्छात्त्वं ब्रुहि ब्रह्मन् (so!) । ओंकारो भवति गायत्र्या उत्पत्तिं श्रोतुमिच्छामि ।

Ends:

यो वै बटुकः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः । ...... भूः पादौ मध्यं भुजः खं शीर्षः विश्वरूपो ऽसि ब्रह्मैकस्त्वम्........विश्वं भुवनानि वा अवते तस्मादुच्यते भगवान्बटुकेश्वरः । ......एको बटुको न द्वितीयो यतो ऽस्ति .... अक्षराज्जायते कालः कालो व्यापक उच्यते । व्यापको हि भगवान्बटुको . ...य इदं (!) बटुकोपनिषदं ब्राह्मणो ऽधीते श्रोत्रियो भवत्यश्रोत्रियो ....स कालज्ञानी भवति स गुर्वनुग्रहभागी भवति । इत्येवं भगवान्बटुकेश्वरं (!) स्तूयते यः स वेद्यं वेदेति ॥ इति अथर्वणरहस्ये श्रीमद्बटुकोपनिषदं समाप्तम् ॥

बह्वृचोपनिषद्

1 copy, in Devanāgarī, with the *Bhāṣya by Appayadīkṣita* (118).

Beginning of the Bhāṣya :

यस्यां देवी महावाक्यैश्चतुर्भिर्भाष्यते पुरा ।
बह्वृचाख्योपनिषदं व्याख्यास्ये तां द्विलिङ्गकाम् ॥

देवीति। **अग्रे** प्राक् जगदुत्पत्तेः **देवी** सगुणनिर्गुणोभयात्मिका **एका** ह्यद्वितीया **आसीत** ॥

End:

अयं भावः। लोके अधीतसमस्तवेदमन्त्रोऽपि पुरुषस्तत्परमतात्पर्यभूतपरब्रह्मात्मैक्यापरोक्षज्ञानानुभवहीनश्चेत्तदा तदध्ययनश्रमश्चित्तशुद्धिमात्रप्रयोजनो भवेत्। न तु सद्योमुक्तिप्रयोजन इति ॥ इति श्रीमत्सुन्दरेश्वर ....समाप्तम् ॥

बाष्कलमन्त्रोपनिषद्

This is one of the four Upaniṣads of the Oupnek'hat (No. 44, called Baschkl) the Saṃskṛt original of which was believed to be lost. Its contents are a Vedāntic paraphrase of the story of the abduction of Medhātithi, the Indian Ganymed.

2 copies, in Devanāgarī: a complete one (92) and an incomplete one (93), the former being contained in a

Vṛtti by an anonymous author.

1 copy, in Devanāgarī (92).

See Appendix.

बिल्वोपनिषद्

See Notices of Sanskrit MSS. by Mahāmahopādhyāya Haraprasāda Śāstrī, Calcutta, 1907, pages V and 177.

1 copy: in Devanāgarī (100).

बृहज्जाबालोपनिषद्

A. Northern Recension.

This recension consists of *ten Brāhmaṇas* comprising the northern equivalents of what is called in the South *Bṛhajjābālopaniṣad*, *Rudrākṣajābālopaniṣad*, and *Bhasmajābālopaniṣad*, and some additional matter besides, as is evident from the table on page 115 above. It is only in this conglomeration that Bṛhajjābālopaniṣad (and so Rudrākṣajābālopaniṣad, as it seems, but not Bhasmajābālopaniṣad) is found in the North.

2 copies: in Grantha (7) and Devanāgarī (115). The former consists of Nos. 10 and 11 of the MS., Uttarajābālopaniṣad being identical with Brāhmaṇa X (Bhasmajābālopanisad) of the Devanāgarī copy, but there is some difference in the arrangement of the other parts: in the Grantha copy, Brāhmaṇa VIII consists of a portion of Rudrākṣajābālopaniṣad (viz., p. $762a^2$–$763a^8$ of the Bombay edition), and the end, with a little extension, of the sixth Brāhmaṇa of Bṛhajjābālopaniṣad; then there follows, after **इत्यष्टमं ब्राह्मणं**, an untitled section answering to Brāhm. VIII of Dev., and finally the concluding section of the Devanāgarī copy excepting the **भस्मगायत्री**, the latter being preserved for the end of the whole text which runs as follows: इति भुसुण्डेश्वरसंवादे बृहज्जाबालोपनिषदि तृतीयः खण्डः ॥ सद्योजाताय विद्महे वामदेवाय धीमहि तन्नो घोरः प्रचोदयात् । इति भस्म गायत्री । *आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्कर-

* These are the same words with which the Upaniṣad begins.

वर्णे समभवत् ॥ उत्तरजाबालोपनिषत्समाप्ता ॥ whereas Dev. ends thus: अथ कालाग्निरुद्रः प्रोवाच । योगध्यानानां शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्यैता(so)मधीत्य ब्राह्मणो वा क्षत्रियो वा गर्भवासान्मुच्यत इत्यों सत्यं । अथ कालाग्निरुद्रः प्रोवाच । सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणापत्यमवाप्नौ(!)ति तृतीयं जप्त्वा देवमनुप्रविशतीत्यों सत्यमों तत्सत्यंमु(!) ओं भद्रं कर्णेभिः शृणुयाम देवाः स्वस्ति न इन्द्रो वृद्धश्रवाः ओं शान्तिः शान्तिः (so) ॥ श्रीविश्वेश्वरार्पणमस्तु ॥ संवत् १८७३ ॥ Some of the Brāhmaṇas, in both the MSS., have the fuller ending: इति (आथर्वणे) मुक्तिश्रुत्यभिधेयायां बृहज्जाबालोपनिषदि, etc. Brāhmaṇa VIII of the Grantha copy ends: त्रितीयं जप्त्वा देवमेवानुप्रविशतीत्यों सत्यमों मत्यं । इत्यथर्वणे मुक्तिश्रुत्यभिधेया रुद्राक्षजाबालोपनिषत्समाप्ता ॥ Brāhmaṇas I–VI are, in both the copies, = Brāhmaṇas I–VI *plus* VIII of the Bombay edition of the 108 Upaniṣads.*

B. Southern Recension.

2 copies: in Grantha (13) and Devanāgarī (117).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins:

भूतिरुद्राक्षयोर्यत्र माहात्म्यं बहुधोच्यते ।
बृहज्जाबालसंज्ञां तां व्याख्यास्ये श्रुतिमद्भुताम् ॥

सलिलजोद्भवो ब्रह्मा तस्य मनसीदं जगत्सृजेयमिति काम उद्भूतः ।

Ends:

न चास्यामुपनिषदि सायुज्यमुक्तिः केवलमुक्ता न कैवल्यमिति वाच्यं

* Correct accordingly page 7, above, where also (not printed) must be replaced by (partly unprinted).

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इत्युपसंहारेण परमस्य विष्णुपदस्याभिहितत्वेन कैवल्यपदस्य संसिद्धत्वात्तस्मादनवद्यम् ॥ इति सुन्दरेश्वरतात...... ..समाप्तम् ॥

बृहदारण्यकोपनिषद्

17 copies: in Grantha (11, 13, 15, 15, 20, 21, 32, 35), Telugu (38, 40, 43, 48), Śāradā (61), and Devanāgarī (92, 95, 96, 110). No. 14 only (fragment) is in the Mādhyandina recension. It ends as follows, omitting the last section of the printed text (ed. Weber): प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥ ३२ ॥ इति श्रीबृहदारण्युपनिषत्समाप्ता ॥ Nos. 3, 4, 9, 11, 12, 15, and 16 contain the fourth Adhyāya only (जनको ह वैदेह आसां चक्रे, etc.)*.

Bhāṣya by Śaṅkarācārya.

1 copy: in Grantha (35).

Bhāṣya-ṭīkā by Ānandagiri.

1 copy: in Grantha (31).

Bhāṣya by Ānandatīrtha.

1 copy: in Nandināgarī (55).

Bhāṣya by Appayadīkṣita (to Adhy. II–IV).

1 copy: in Grantha (11).

Begins:

सर्वलक्षणसंपन्नं सद्गुरुं सुन्दरेश्वरं ।

* It must be remembered that in many MSS. the Adhyāyas are counted as III to VIII, not I to VI.

नत्वेह बृहदारण्यं व्याख्यास्ये संग्रहेण तु ॥

प्रथमद्वितीयतृतीयाध्यायानां सगुणोपासनप्राधान्येन प्रवृत्तत्वात्तद्व्याख्यानस्येह निर्गुणज्ञानोपासनप्राधान्येन प्रतिपिपादयिषिताध्यात्मविद्यानुपयुक्ततामभिप्रेत्य दृप्तबालाकिरित्यादिचतुर्थाध्यायमारभ्य* व्याख्यास्यते ।

Ends:

यथा चायमर्थश्चतुर्थपञ्चमषष्ठाध्यायैः सप्रतियोगिकब्रह्मप्राधान्येन प्रदर्शितः । एवं विद्वान्न कुतश्चन बिभेतीति सिद्धम् । इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयशिवाचार्यकृतौ बृहदारण्यकोपनिषद्भाष्ये षष्ठोऽध्यायः समाप्तः ॥

बृहन्नारायणोपनिषद्

See महानारायणोपनिषद् (I).

ब्रह्मजिज्ञासोपनिषद्

Though in the Marāthī language, this work may be included here, because it is likely to be a representative of a lost Saṃskṛt original. It is, like Sarvopaniṣatsāra and Nirālambopaniṣad, a kind of Advaita catechism defining, among others, the following notions: the five names of Brahman (Brahman, Jīva, Kāla, Karman, Svabhāva); the five names of Māyā (Māyā, Ākāśa, Śūnya, Śakti, Prakṛti); Ṣaḍviṃśaka-Mahāviṣṇu; Tattvam asi; the five Mudrās.

1 copy: in Devanāgarī (104).

* Compare preceding note. App. omits the first Adhyāya and the Khilakāṇḍa (Adhy. V and VI).

Begins :

श्रीगणेशाय नमः । अथ ब्रह्मजिज्ञासाउपनिषत् ॥ ब्रह्म एकशुद्ध-चैतन्य द्वितीय ब्रह्मकी माया । माया ब्रह्म को एसो संयोग यैसी वृक्ष-की छाया तें वृक्ष न्यारो नाही वृक्ष विना छाया न हइ । माया ब्रह्म को येसो संयोग । ब्रह्म शुद्धचैतन्यं माया अनित्यचैतन्यं । माय उपर ब्रह्म ब्रह्म उपर कोइ नाही । ततः परं एकाकी रमते ब्रह्म ।

Ends :

ऐसो षड्डुमां जीव ततो जीवन्मुक्त कह्वै । सो परमतमा को स्वरूप कहिये ॥ इति ब्रह्मजिज्ञासोपनिषत् ॥

ब्रह्मबिन्दूपनिषद्

In the South, and sometimes in the North, it is called **अमृतबिन्दूपनिषद्**, and in the Bombay Presidency, at least, there are three more names for it, viz., **बिन्दु-स्तोकोपनिषद्**, **उपनिषद्मृतबिन्दु**, and **मानसोपनिषद्** the first of which is also alluded to by Nārāyaṇa in his introductory Śloka (**स्तोकोपनिषद्**) .

A. Northern Recension.

5 copies : in Devanāgarī (77, 103, 109, 114), and Śāradā (59).

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Southern Recension.

9 copies : in Grantha (6, 13), Telugu (37, 39, 49), Śāradā (60), and Devanāgarī (91, 93, 117).

(Dīpikā by Śaṅkarānanda, see Poona ed.).

Bhāṣya by Appayadīkṣita (Devanāgarī, 117).

Begins :

यदक्षराणि सर्वाणि भान्त्येवामृतबिन्दुवत् ।
एनाममृतबिन्द्वाख्यां व्याख्यास्ये श्रुतिमादरात् ॥

अत्र **शुद्ध**मनस एव तत्त्वज्ञानोपदेशाधिकारात्तद्दिदर्शयिषुरादौ मनसः **द्विविधं** स्वरूपं विवृणोति । **मन** इति । **कामसङ्कल्पं** कामे काम्यवस्तुलाभे सङ्कल्पो यस्य तत् ।

Ends :

केचिद्धि साधका अन्तरात्मानं गृह्णीयुः केचित्तु बाहिरात्मानं । अतः सर्वानुग्राहकत्वेनान्तर्बहिश्चावतिष्ठत इत्युक्तोपनिषदमुपसंहरति । **सर्वे**-ति **सर्वभूताधिवासं** सर्वेषां भूतानामधिवासो यस्मिस्तत् । **तद्ब्रह्मैव वासुदेवः अहमस्मी**ति द्विर्वचनमुपनिषत्समाप्त्यर्थम् ॥ इति सुन्दरेश्वर.... ....समाप्तम् ॥

Another pair of recensions, possibly a more original one (compare especially beginning and end) is preserved in the *Fifth Upaniṣad of Tripurātāpinī* (73, 79, 80, 82, 101; 5, 120 *).

ब्रह्मविद्योपनिषद्

A. Northern Recension.

It is also called **प्रणवोपनिषद्**.

7 copies : in Śāradā (59) and Devanāgarī (67, 87, 90, 103, 105, 114).

(Dīpikā by Nārāyaṇa, see Poona ed.).

---

* The remaining copies are incomplete breaking off before the Fifth Upaniṣad.

B. Southern Recension.

It omits the first Śloka of A and adds to the remaining 13 Ślokas 97 more.

2 copies: in Grantha (14) and Devanāgarī (118).

Bhāṣya by Appayadīkṣita.

2 copies: in Devanāgarī (63, 118).

Beginning:

उत्तरोत्तरमुत्कृष्टा यत्राचार्यास्त्रयो मताः ।
ब्रह्मविद्योपनिषदं व्याख्यास्ये तामिमामिह ॥

नन्वेकस्यामुपनिषद्युक्ता एवार्थाः पुनः पुनरन्यासु चोपनिषत्सूच्यन्ते ।

End:

तस्मात्प्रमाणत्रयानुरोधेन प्रपञ्चितानिमान्सूक्ष्मार्थान्धीमन्तः सूक्ष्मया धियावगच्छेयुरित्यस्मन्मनो विश्वसिति ॥ इति सुन्दरेश्वर....समाप्तम् ॥

ब्रह्मोपनिषद्

A. Northern Recension.

5 copies: in Grantha (28), Śāradā (59), and Devanāgarī (103, 108, 114). No. 1 begins: अथ शुक्लयजुर्वेदब्रह्मोपनिषत् ॥ सह नाववतु .. .शान्तिः ॥ अथ हैनं महाशालाः शौनकोऽङ्गिरसं (!), etc.

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Southern Recension.

It omits the first section of A and so begins: अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति.

10 copies: in Grantha (7, 13), Telugu (38, 36, 49), and Devanāgarī (74, 76, 76, 86, 117). No. 7 ends:
इति श्वेताश्वतरशाखागतब्रह्मोपनिषत्समाप्तम् ॥

(Dīpikā by Śaṅkarānanda, see Poona ed.).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins:

ब्रह्माख्यं परमं सूत्रं प्रोच्यते यत्र पावनम् ।
एतां ब्रह्मोपनिषदं व्याख्यास्ये ऽन्वर्थसंज्ञिकाम् ॥

अथेति मङ्गलार्थः शब्दः **पुरुषस्य** शिरःपाण्यादिमतः शरीरस्येत्यर्थः ।

Ends:

यथा सामान्यात्मविद्या जीवात्मानं परमात्मानं नयति सर्वमनवद्यम् । तद्ब्रह्मोपनिषत्परमित्यभ्यासोपनिषत्परिसमाप्तिद्योतनार्थः ॥
इति श्रीमत्सुन्दरेश्वर......समाप्तम् ॥

ब्रह्मोपनिषत्सारसंग्रहदीपिका

To what extent this is a Dīpikā, the work gives no clue. The word **ब्रह्मोपनिषद्** of the title is hardly intended to mean anything else but the whole of the ancient Upaniṣads (chiefly engaged with *brahmavidyā* in the narrower sense). The work abounds with (slightly modified) quotations from this literature. It is mainly in verses.

1 copy: in Devanāgarī (113).

Begins :

ओं श्रीगणेशाय नमः ॥ ओं तत्सत् ॥ * * * तश्च यः । यश्च सर्वमयो नित्यं तस्मै स * * * खल्विदं ब्रह्म नेह नानास्ति किंचन । पुरु * * * व्यं नारायण एवेदं यद्भूतं यच्च भाव्यं । * * * ति खं वै नाभि सोमसूर्यौ च नेत्रे । दिशः श्रो * * * व्यो ऽसौ सर्वभूतान्तरात्मा ॥ १ ॥ अग्निर्मूर्धा च * * * न्ते वाग्विवृत्ताश्च वेदाः । वायुः प्राणो हृदयं * * * ष सर्वभूतान्तरात्मा ॥ २ ॥ ब्रह्मैव वेदममृतं * * * तश्चोत्तरेण । अधश्चोर्ध्वं प्रसृतं तद्धि ब्रह्म ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ ३ ॥ बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति । दूरात्सुदूरेण तदिहान्तिके च पश्यन्ति हैव निहितं गुहायां ॥ ४ ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा । सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ ५ ॥

Pattra 12b : ॥ ११२ ॥ एवं ह वैतत्सर्वं परे आत्मनि संप्रतिष्ठते।पृथिवी च पृथिवीमात्राश्चापश्चापोमात्राश्च तेजश्च तेजोमात्राश्च वायुश्च वायुमात्राश्चाकाशं चाकाशमात्राश्चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च, etc.

Ends :

तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ ४९ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ५० ॥

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति । नास्याब्रह्मवित्कुले भवति । तरति शोकं तरति पाप्मानं गुहाग्रन्थेभ्यो विमुक्तो ऽमृतो भवति ॥ ५१ ॥ इति श्रीब्रह्मोपनिषत्सारसंग्रहदीपिका समाप्तम् ॥ शुभमस्तु सर्वजगताम् ॥

ब्रह्मोपनिषद्मन्त्रकवच

On the cover it is called **ब्रह्मोपनिषत्कवच**, but both the titles may be incorrect. It is an Aupaniṣadic work treating of the "*kavaca* (amulet, charm) made by Brahman", i.e., a *devī-stuti* which, if put at the head of a mantra, will prevent any bad effect which would otherwise result from a mistake in the pronounciation, etc.

1 copy: in Devanāgarī (67). Faulty.

Begins:

श्रीगणेशाय नमः ॥

अष्टक उवाच ।

किमर्थं साधका लोके मन्त्रं साधितुमुद्यत(ाः) ।
म्रियन्ते साधका भूत्वा तन्मे ब्रूहि समासतः ॥

वसिष्ठि उवाच ।

न जानन्ति परं मूढाः कवचं ब्रह्मनिर्मितम् ।
म्रियन्ते साधकास्तेन तदाहंकारसंयुताः ॥ etc.

Ends:

नैव वाच्यमतुष्टाय (?) नाभक्ताय न दुर्जने ।
शिष्टे भक्ते रहः (?) शुद्धे सत्यवादिनि पण्डिते ॥
कुलीने सुभगे मित्रे प्रणवदे (so) दृढव्रते ।
महात्मनि समादेश्यं पुत्रे च सुपरीक्षिते ॥

इति ब्रह्मोपनिस्त(so)मन्त्रकवचं समाप्तम् ॥

भस्मजाबालोपनिषद् (I)

A. Northern Recension.

See Bṛhajjābālcpanisad, A.

4 copies: in Grantha (7) and Devanāgarī (64, 102, 115). No. 1 is called **उत्तरजाबालोपनिषद्.** No. 4 ends: **इति बृहज्जाबाले दशमब्राह्मणे अविमुक्तवैभवप्रकाशो नाम तृतीयः खण्डः ॥** No. 3 has one section more at the beginning, viz., Bṛhajjābālopaniṣad VII, 1–7 (p. 276a[1]–277a[6] of Bombay ed.), and it closes with the concluding section of MS. IX G 53 (above, p. 115) which, however, has here the following ending: सर्वमन्यत्परित्यज्यैनामधीत्य गर्भवासान्मुच्यत इत्यों सत्यम् । भद्रं कर्णेभिरिति शान्तिः ॥ इति श्री-भस्मजाबालोपनिषन्मूलं संपन्नम् ॥

Viṣama-pada-vyākhyā, by an anonymous author, on a Ṭīkā by Śivānandayati.

1 copy: in Devanāgarī (102).*

Begins:

अथ प्रथमब्राह्मणविवरणम् । अथ खलु भगवान् विश्वेश्वरो ऽखिलाश्रितप्राणि विमुक्तये अविमुक्ते ऽनवरतविरचितसन्निधिर्मुमुक्षु बुभुक्षूणां उपकारायादौ वेदादीन् विश्वासवदभिव्यञ्जयन् पुनः सर्वोपकाराय दयया केवलमाथर्वणमिखिलश्रुतिशिरोभूषणायमानां भस्मजाबालश्रुतिमणिं प्रकटयन् मुक्तिसुखवदान्यस्थिरासनो विराजत इति वेद लोकप्रसिद्धमेव । तामेव श्रुतिं श्रीकाशीसमागतानां पूर्वपुण्यवशादामरणवासिनामारब्धान्तं साधकबाधकबोधाय दयानिधिनान्तर्यामिणा परमेश्वरेण प्रचोदितः **शिवानन्दयतिः** स्वात्मसुखाय विवरिष्यन् निष्प्रत्यूहप्रचयगमनार्थं शिष्टाचारप्राप्ताभीष्टदेवता स्मृतिलक्षणं मङ्गलमाचरति । भातीति ।

भाति यत्सर्वरूपेण रक्षकं चाघभक्षकम् ।
अविमुक्तेशमात्मानमाश्रये बन्धमुक्तये ॥

---

* with the complete *mūla*; see above.

अस्यार्थः । यत्सर्वाधारं अत एव सर्वरक्षकं अज्ञजनकृताघकुलस्य भक्षकं पापसमूहनिवर्तकमिति ॥

Ends:

स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः । इति श्रीभस्मजाबालोपनिषट्टीका संपन्ना ॥

टीकेति टीक्यते ज्ञायते अर्थो ऽनयेति टीका । टीकृ गतौ । विषमपदव्याख्येत्येके । निरन्तरपदव्याख्येत्यपरे । अत्र तु विषमपदानि हि व्याख्यातानि । तस्मान्न निरन्तरवाक्येत्यर्थः ।

श्री भैरवप्रसन्नो सदा गो विस्मृत्य सादरम् । (so)
शिवं नयतु मामन्ते सदा सत्वनिशं शिवम् ॥

B. Southern Recension.

Differs but little from A.

2 copies: in Telugu (38) and Devanāgarī (120).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (120),

Begins:

यस्यां संप्रोच्यते मुक्त्यै भस्मधारणवैभवम् ।
सेयं तु भस्मजाबालश्रुतिर्व्याख्यास्यते ऽधुना ॥

नन्विह **शिवनामान्यनिशमुच्चरन्तमित्युक्तम्** । कथमेतदुपपद्यते । शिवस्य स्वनामोच्चारणे किं प्रयोजनम् ॥

Ends:

अस्य द्वितीयाध्यायस्य बृहज्जाबालोपनिषदि प्रकृतत्वेन व्याख्यातपूर्वत्वादिहाव्याख्यातत्वमवगन्तव्यम् ॥ इति सुन्दरेश्वर......समाप्तम् ।

भस्मजाबालोपनिषद् (II.)

In the colophon it is called **ऋग्वेदे भस्मजाबालोपनिषद्.** It begins with a section answering to Bṛhajjābālopaniṣad VII, 5 fll. (Bombay ed. p. 276b5 fll.) and is quite different from the preceding work. Compare **ऋग्वेदजाबालोपनिषद्.**

1 copy: in Telugu (38). Same as No. 669 of the Govt. Or. MSS. Library, Madras.

भावनोपनिषद्

12 copies: in Grantha (29, 29, 30), Telugu (36, 39, 46), Śāradā (60), and Devanāgarī (88, 104, 116, 116, 120). No. 12 ends: **स एव शिवयोगीति कथ्यत इत्युपनिषत् ॥** but Nos. 1, 3, and 8 have: **स एव शिवयोगीति गद्यत इति (निगद्यते,** 8) **। कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः । य एवं वेद सो ऽथर्वशिरो ऽधीते । (पूर्णमदः,** etc., 8; **शान्तिः त्रिः,** 3) **इति भावनोपनिषत्समाप्ता ॥** and a similar conclusion is found in Nos. 2, 4, 5, and 6, viz., **कादिहादिमतोक्तेन भावना प्रतिपादिता । य एवं वेदेत्युपनिषत् ।,** etc. (**इति कादिमतोक्तप्रकारेण भावनोपनिषत्समाप्ता,** 4). There are further the following endings: चिन्तितकार्याण्यन्यायासे(!)न सिध्यन्ति । शान्तिः, etc. (7); कादिमतोक्ता स्वात्मभावना ऽनेन श्लोकेन जपो जल्प (?) इत्यादिना प्रतिपादिता भवतीति ज्ञेयं (9); शाठिनमतोक्तेयं भावनोपनिषत् (10); कापिलमतेनान्तश्चक्रभावना प्रतिपादिता, etc. (11).

Note on Kādi-mata. The Adyar Library possesses two MSS. of one *Kādimata-tantra* which introduces itself in the following way:

Bhāṣya by Bhāskararāya.

3 copies: in Grantha (29), Telugu (50), and Devanāgarī (101).

Beginning:

श्रीनाथाङ्घ्रिपरागैकोपरागादपरागधीः ।

भावनोपनिषद्भाष्यं (अथर्वशिरसो भाष्यं, 1) भाषते भास्करः सुधीः॥

इह खलु श्रीमहात्रिपुरसुन्दर्याः सपरिवारायाः (सपरिसरायाः, 1; not in 2) स्थूलसूक्ष्मपररूप (°पारम्पर्य ! 1,) भेदेन त्रिविधाया उपास्तिरूपाः क्रिया अपि त्रिविधाः । कायिकी वाचिकी मानसी चेति । तासां च बहिर्यागजपान्तर्यागादिरूपाणामेकैकस्यामितरयोः संवलितत्वे ऽपि प्राधान्यप्राचुर्याभ्यां कायिकत्वादिव्यपदेशः एतास्वादिमद्वयं त्रिपुरातापिन्याद्युपनिषत्सूपादिश्य ततो ऽपि रहस्यभूतां कालचक्रान्तर्गतश्री-

---

श्रीदेव्युवाच ।

भगवन्त्सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशीनां च नवतन्त्राणि कृत्स्नशः ॥
तेषामन्योन्यसापेक्षाज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ॥

श्रीशिवः ।

शृणु कादिमतं तन्त्रं पूर्णमन्यानपेक्षया ।
गोप्यं सर्वप्रयत्नेन गोपनं तन्त्रचोदितम् ॥

श्रीदेवी ।

कथं कादिमतं नाम्ना तन्मे ब्रूहि महेश्वर ।

श्रीशिवः ।

कादिः काळीति शक्ती स्तः पुरा तत्तन्मां मया (तत्र स्मितान्वया, *b*)
प्रोक्ते तन्त्रे कादिकाळीमताख्ये तेन नामतः ।
शृणु तत् (so) सर्वतन्त्राणां राजानं सर्वसिद्धिदम् ॥

चक्रस्य भावनानाम्नी तृतीयामुपास्तिमथर्वणनामा वेदपुरुषो योगिजनानुजिघृक्षया प्रकाशयन्नादौ सद्गुरोः परं रूपं विधत्ते । **श्रीगुरुः सर्वकारणभूता शक्तिरित्यादि**, etc.

End :

यो ऽर्थज्ञ इत्सकलं भद्रमश्नुत इति श्रुत्यन्तरे सकलपदस्वारस्याच्छब्दमात्रपाठादपि किञ्चिद्भद्रमस्त्येवेति लभ्यत इति शिवं ॥

इति भावनोपनिषदो ऽथर्वणशिरसो ऽतनोद्भाष्यं ।
भास्कररायो विदुषां तुष्ट्यै जीवन्मुमुक्षूणाम् ॥

Copy 2 adds: इति भावनोपनिषद्भाष्यं संपूर्णमगमत् । श्रीगुरुदक्षिणामूर्तये नमः ॥

Prayogavidhi by Bhāskararāya.

2 copies : in Grantha (29) and Devanāgarī (101).

Beginning :

अथ भावनोपनिषदा मुक्त्यै या भावनाः कथिताः ।
भास्कररायो रचयति तासामेकं प्रयोगविधिम् ॥

मूलेन प्राणानायम्य ऋष्यादिन्यासत्रयं कृत्वा विवेकवत्य(°वृत्य, 2) वच्छिन्नचिच्छक्तिरूपसुषुम्नात्मने श्रीगुरवे नमः । इति ब्रह्मरन्ध्रं (°ध्र, 1) स्पृष्ट्वा । दक्षश्रोत्तरूप (°रूपाय, 1) पयस्विन्यात्मने प्रकाशानन्दनाथाय नमः ।

End:

ततो ऽवतीर्य प्राणयामत्रयं (प्राणयामं, 2) ऋष्यादिन्यासत्रयं च कृत्वा गुरुं स्तुवीतेति सर्वं शिवं ।

भावनोपनिषत्प्रोक्त* भावनानां सतां मुदे ।
इति भास्कररायेण प्रयोगविधिरीरितः ॥

---

* अथर्वशिरसि प्रोक्त, 1.

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (120).

Beginning :

श्रीचक्राराधनं स्थूलं निन्द्यते भावनान्तरात् ।
यस्यां व्याख्यास्यते सेयं भावनोपनिषन्मया ॥

अत्र खलु **परमकारणभूता शक्तिः श्रीगुर्वनन्येति** नवशक्तिमयं श्रीचक्रं नवरन्ध्ररूपदेहानन्यादिति चैवमादिनिरूपणैरन्यथा भावनारूपं श्रीचक्रोपासनक्रममविज्ञयानया चोपनिषदा स्थूलं बाह्यं च श्रीचक्रोपासनमेवाभिहितमिति बिन्दुत्रिकोणेत्यादिश्लोकानुरोधेन केचिच्छ्रीचक्रं विलिख्योपासते । ते तु मन्दबुद्धयो, etc.

End:

न च **चिन्तितकार्य**सिद्ध्यभिधानात्सगुणोपासनमेवात्रोक्तं स्यादिति शङ्क्य (so) निर्गुणोपासकानामपि मोक्षकार्यसिद्धेः । तस्मात्सर्वमनवद्यमवगन्तव्यम् ॥ इति सुन्दरेश्वरतात.... . समाप्तम् ॥

भिक्षुकोपनिषद्

This is a separate recension of the fourth section of आश्रमोपनिषद्.

5 copies: in Telugu (38) and Devanāgarī (83, 113, 114, 119).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (119).

Begins :

कुटीचकादिसन्यासाश्चत्वारो यत्र वर्णिताः ।
भिक्षुकोपनिषत्सेयं मुक्त्यै व्याख्यास्यतेऽधुना ॥

ननु तमेव धीरो विज्ञायेति तमेव विदित्वातिमृत्युमेतीति । etc.

Ends :

तस्मात्सर्ववर्णभिक्षावतामप्यतिवर्णाश्रमिणां त्यक्ताशेषलौकिकव्यापारत्वे सति न कश्चिदपि प्रत्यवाय इति मन्तव्यम् ॥ इति सुन्दरेश्वर........ समाप्तम् ॥

मठाम्नायोपनिषद्

On the difference of the four Mathas (Mutts)* established by Śrī-Śaṅkarācārya, through his four foremost pupils, in the four quarters of India. Each Maṭha is described as preserving one Veda, one Mahāvākya, one cult, etc. The second part (Uttarāmnāya) deals, in an analogous, but merely symbolical way, with three ideal Maṭhas, viz., Sumeru, Paramātman, and Śāstrārthajñāna. Ascribed to Śaṅkara himself.

1 copy : in Devanāgarī (70). Very faulty.

Begins :

श्रीगणेशाय नमः ॥ ओं ऊर्ध्वाम्नाय गुरूपदेशभुवनाकारसिंहासन सिद्धाचारवन्दितं समस्तवेदवेदान्तसार निर्माणं परात्परं........तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ओं प्रथमे पश्चिमाम्नाय शारदा मठ कीटवारि संप्रदाय तीर्थाश्रमपद द्वारका क्षेत्र, etc.

Ends :

........विमलतीर्थ आत्मलिङ्ग शान्त्यर्थे विचार नित्यानित्यविवेकेन० ॥

* The word monastery does not quite answer to this term because of the absence of a common discipline for all the inhabitants of a Maṭha and for other reasons.

ओं नमो ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितं मठाम्नायोपनिषत्समाप्तम् ॥

मण्डलब्राह्मणोपनिषद्

1 copy, in Devanāgarī (118), with the *Bhāṣya by Appayadīkṣita.*

Beginning of the Bhāṣya:

यत्रोक्तं तारकद्वारा परब्रह्मात्मदर्शनं ।
सेयं व्याख्यास्यते त्वद्य मण्डलब्राह्मणश्रुतिः ॥

नन्विह प्रथमब्राह्मणोपसंहारे ऽन्तर्लक्ष्यदर्शनेन जीवन्मुक्तिदशाया-मित्युक्तं ।

End:

सुदृढं निश्चित्य तुरीयाश्रमविमुखा एव ब्रह्मप्रणवार्थविचारादिभिः कृतार्था भवेयुरित्यवगन्तव्यम् ॥ इति सुन्दरेश्वर........समाप्तम् ॥

मनोविश्रामोपनिषद्

See विश्रामोपनिषद्.

मन्त्रिकोपनिषद्

This is the Southern recension of चूलिकोपनिषद्.

4 copies: in Grantha (14, 28), Telugu (38), and Devanāgarī (117). No. 2 begins: ओमथ शुक्लयजुर्वेदमन्त्रो-पनिषत् ।

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins :

मन्त्रैराथर्वणैर्यस्यां ब्रह्मनिष्ठाभिधीयते ।

मन्त्रिकोपनिषत् सेयं सभाष्या क्रियते ऽधुना ॥

अष्टपादमिति भूम्याद्यष्टप्रकृतय एव पादा यस्य तं । जाग्रत्स्वप्नसुषुप्त्याख्यानि त्रीणि सूत्राणि यस्य तं । मूलाधारानाहताज्ञाख्यानि त्रीणि वर्त्माणि यस्य तम् ।

Ends :

ये ब्रह्म सगुणं ब्रह्म निर्गुणमिति विदुः ते ब्राह्मणा अत्रैव लयं यान्ति । इति मन्त्रिकोपनिषद्भाष्यं समाप्तम् ॥

मन्त्रोपनिषद्

This is Bhāgavata-Purāṇa VIII, 1, 9–17.

1 copy : in Devanāgarī (71).

महाचक्रावरणोपनिषद्

See त्रिपुरातापिन्युपनिषद्.

महानारायणोपनिषद् (I)

A. Taittirīya Recensions (Yājñikyupaniṣad).

I. Āndhra. 11 copies : in Grantha (3, 7, 9, 9, 9, 33), Telugu (40, 41), and Devanāgarī (70, 83, 95). No. 9 only is accentuated.

II. Drāviḍa. 3 copies: in Grantha (4, 19, 25).

Bhāṣya by Sāyaṇa (Nārāyaṇīyavallī-bhāṣya).

1 copy: in Telugu (41).

B. Ātharvaṇa Recension (Bṛhannārāyaṇopaniṣad).

This is in some MSS. divided into Pūrva and Uttara, the latter beginning with Khaṇḍa 13 of Colonel Jacob's edition.

4 copies: in Śāradā (59) and Devanāgarī (103, 109, 114).

C. Apāṃ Brāhmaṇam, in a Śāradā MS. (61), standing midway between A II and B and corresponding with Khaṇḍas XII, 2–3; XIII, 1, 6, 7; XXV; and XIV, 1 of Colonel Jacob's edition. It has some peculiar readings, e.g., स्वयम्भूर्विष्णुरीशः प्रजापतिस्संवत्सर इति संवत्सरो वा आदित्यो (XII, 3); पञ्च वै पञ्च देवा गन्धर्वा for कृणुष्व........पञ्च। अदितिर्देवा गन्धर्वा (XIII, 6, 7); etc.

महानारायणोपनिषद् (II)

Called also **परमतत्त्वरहस्योपनिषद्** and (though in none of our MSS.) **त्रिपाद्विभूतिमहानारायणोपनिषद्** under which name it is described in the catalogue of the Govt. Or. MSS. Library, Madras, p. 409. The one northern MS. (below, fourth copy) gives the first Adhyāya as the whole Upaniṣad, and a still shorter portion of this Adhyāya corresponds with Parabrahmopaniṣad (II).

5 copies: in Grantha (28, 29), Telugu (47), and Devanāgarī (71, 118).

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (118).

Begins :

यत्रोच्यते पादचतुष्टयं तत्
सतो ऽपि साकारनिराकृती च ।
व्याख्यास्यते सा महती त्विदानीं
नारायणस्योपनिषद्रहस्या ॥

नन्विह **त्वमेव सर्वज्ञ** इत्यादि वाक्यैः ब्रह्मा परतत्त्वरहस्यं सम्यग्ज्ञातवानित्येवावगम्यते । कुतः ।

Ends :

........मोक्षार्थकपरिश्रमो जीवानां वृथैवेति चेन्न । इदानीं तस्य निमेषाभावः । पिपीलिकाद्यन्त(!)सर्वजीवमोक्षमात्रस्य प्रतिबन्धकः । न तु वाक्यार्थश्रवणादिमोक्षसाधनवतां मोक्षस्य सद्योमुक्त्यर्थकशास्त्राणां तेनैव प्रणीतत्वात् । तस्मात्सर्वमनवद्यम् ॥ इति चतुर्थोध्यायः ॥ सुन्दरेश्वर... समाप्तम् ॥

महावाक्यविवरणोपनिषद्

An explanation, in modern prose, of 'great sayings' of the Upaniṣads, i.e., short sentences, such as तत्त्वमसि, ब्रह्मैवेदं सर्वं, नेह नानास्ति किञ्चन, which are believed to express the gist of Vedānta.

1 copy : in Telugu (41).

Begins :

हरिः ओं ।

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।

यज्ज्ञानाच्छ्रेय आप्नोति तस्मै ज्ञानात्मने नमः ॥

साधनचतुष्टयसंपन्नस्य विधिवदुपपन्नस्य मोक्षसाधनब्रह्मात्मैक्यज्ञानायाशेषवेदान्तमहावाक्यार्थं विचारयामः ।

Ends :

एवं श्रुतिस्मृतिपुराणेभ्यो ऽर्थो ऽध्यवसीयते ॥ ओं नमो ब्रह्मविद्भ्यः । परं नास्ति न भूतो (?) न भविष्यति । हरिः ओं । सह नाववतु । ओं शान्तिः शान्तिः शान्तिः । इति श्रीमहावाक्यविवरणोपनिषत्समाप्ता ॥

महावाक्योपनिषद्

2 copies: in Grantha (8) and Devanāgarī (118).

Bhāṣya by Appayadīkṣita (Dev., 118).

Begins :

महावाक्येष्वनुक्तेषु प्रसिद्धेष्वपि यन्महत् ।
हंस इत्यादि वाक्यं च तद्व्रत्त्वादभिधा तथा ॥
अनुसृत्याजपां यत्र ब्रह्मध्यानाद्युदीर्यते ।
महावाक्योपनिषदं व्याख्यास्ये सरलोक्तिभिः ॥

अथहोवाच ब्रह्मा ब्रह्मात्मैक्यापरोक्षानुभवपरामुपनिषदं व्याख्यास्याम इति ।

Ends :

असावहोमित्योङ्कारस्वरूपत्वं चात्मन इति एतदथर्वशिरो ऽधीते इत्यादि स्पष्टार्थमन्यत् ॥

इत्यप्पयदीक्षित..........................समाप्तम् ॥

महोपनिषद्

A. Northern Recension.

11 copies: in Telugu (50), Śāradā (59, 60), and Devanāgarī (76, 83, 87, 90, 96, 103, 108, 114).

(Dīpikās by Nārāyaṇa and Śaṅkarānanda).

B. Southern Recension.

Not less than 535 Ślokas (Adhyāyas II to VI) are inserted here between the bulk of A and the concluding section.

1 copy, in Devanāgarī (119), with the

Bhāṣya by Appayadīkṣita.

Beginning of the Bhāṣya:

शुकस्य जनकस्याथ संवादो ऋभुनिदाघयोः ।
यस्यां महोपनिषदि व्याख्यास्ये तामिमामिह ॥

आदौ निर्विशेषे परस्मिन्नाकाशवत्सर्वगते ब्रह्मणि तदभिन्नाकृतिरेको नारायण आसीत् ॥

End:

तथाविधः सन् त्वं निर्विकल्पं निर्गताः शब्दानुविद्धसमाधिगता अशेषा विकल्पाः यस्मात्तत्पदं निर्विकल्पसमाधिस्थानं गत्वा हे मुनीश्वर निदाघ स्वस्थः स्वस्वरूपनिष्ठो भव ॥ इति सुन्दरेश्वर........समाप्तम् ॥

माण्डूक्योपनिषद्

(a) Text only. 4 copies: in Grantha (19), Telugu (43), and Devanāgarī (84, 95).

(*b*) *Text with Kārikā I.* * 12 copies: in Grantha (10, 14, 15, 16, 29, 32, 35, 34), Telugu (36, 43, 48), and Śāradā (60).

(*c*) *Text with complete Kārikā.* 5 copies: in Śāradā (59) and Devanāgarī (78, 103, 109, 114).

Bhāṣya by Śaṅkarācārya.

to (*b*) 2 copies: in Grantha (18, 35).
to (*c*) 2 copies: in Grantha (17) and Telugu (47).

Bhāṣya by Ānandatīrtha (to *b*).

1 copy: in Nandināgarī (55).

Bhāṣya by Appayadīkṣita (to *b*).

1 copy: in Grantha (11).

Begins:

तुर्यातीतस्वरूपं तं नत्वा श्रीसुन्दरेश्वरं ।
माण्डूक्योपनिषद्भाष्यं रचयाम्यहमादरात् ॥

ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानमिति । अस्या माण्डूक्योपनिषदः ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः । ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथेति ॥ श्रुत्युक्तेशादिदशोपनिषदां मध्ये, etc.

Ends:

आकाशवत्सर्वगतस्य च निष्प्रतियोगिकब्रह्मत्वमनुपपन्नं असर्वगतजीवप्रतियोगिकत्वात्तस्मात्सप्रतियोगिकस्सन्मात्र अर्धमात्रा तुर्यः **शिव एवामात्रशब्द** इति व्याख्यानं समञ्जसमिति स्थितं ॥ इत्यप्पयाशिवाचार्यकृतौ माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

---

* The first Prakaraṇa only of Gauḍapāda's Kārikā is a paraphrase of the Upaniṣad, the others forming a kind of appendix of quite an independent character.

मुक्तिकोपनिषद्

4 copies : in Grantha (28), Telugu (37), and Devanāgarī (100, 120).

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (120).

Begins :

ओं अथ मुक्तिकोपनिषद्व्याख्या मुक्तिचन्द्रिका प्रारभ्यते ॥

श्रीमत्सुन्दरसद्गुरुं प्रथमतो नत्वाऽऽत्मबोधप्रदं
शान्तिं सप्रणवां च पूर्णमद इत्येनां पठित्वा ततः ।
व्याख्यास्ये खलु मुक्तिकोपनिषदं वेदान्तसारात्मिकां
तेनात्मा परमः प्रसीदतु विभुः सन्नित्यमुक्तः सदा ॥
यस्मादष्टोत्तरशततमी मुक्तिकाख्येयमासीत्
तस्माच्चूडामणिमुपनिषद्घोषितः सन्त आहुः ।
यद्द्रष्टॄणां भवति सुलभा जीवतो देहतो वा
मुक्तिः श्रुत्या न हि न हि समा कापि वेदान्तवाणी ॥
आचार्यशिष्यपितृपुत्रभिदाविहीनो
विष्णुर्वसिष्ठहनुमद्गुरुशिष्यभावम् ।
भूमौ ययौ दशरथात्मजतां पितृत्वं (so)
ताभ्यां च चित्तमिह पातु स रामचन्द्रः ॥

इह खल्वीशाद्यष्टोत्तरशतोपनिषत्सु तत्तदुक्तशान्तिपठनपूर्वकं गुरुमुखादधीत्य सम्यक् पर्यालोच्यमानासु तत्त्वज्ञानतत्साधनप्रतिपादनपरा दशोपनिषत् । परतत्त्वज्ञानतत्साधनप्रतिपादनपरा द्वात्रिंशाख्योपनिषत् । परमात्मतत्त्वज्ञानतत्साधनप्रतिपादनपराष्टोत्तरशतोपनिषदिति चावगम्यते । कुतः ।

Ends :

........विष्णोर्यत्परमं पदमित्युपनिषत् । अस्या ऋचो ऽर्थो ऽन्यत्र वर्णित एवेत्यत इह न प्रपञ्च्यते ।

श्रीमत्सुन्दरतातपादचरणाम्भोजद्वयासक्तधीः
जातश्चाप्पयदीक्षितोत्तमकुले भूमौ महापावने ।
सो ऽहं चाप्पयनामकः सुशिरः सारांशभूतामिमां
व्याख्यायैव हि मुक्तिकोपनिषदं शान्तः कृतार्थो ऽभवम् ॥

सकलनिगमसारं सर्वमोक्षैकसारं
निखिलविबुधसारं नित्यपीयूषसारम् ।
श्रवणमननसारं ध्यानसारं समाधि-
प्रकटितबहुसारं साधु पश्यन्तु सन्तः ॥

इमां गुरुमुखाच्छ्रुत्वा लोके ऽस्मिन्मुक्तिचन्द्रिकाम् ।
को न मुच्येत संसाराद्बहुदुःखकरादपि ॥

दुर्लभो मानुषो देहस्तत्रापि श्रुतिदर्शनम् ।
तत्राप्यष्टोत्तरशतं तत्रेयं मुक्तिचन्द्रिका ॥

इति श्रीमत्सद्गुरुसुन्दरेश्वरतातपादशिष्याप्पयदीक्षिताचार्यकृतौ अ-ष्टोत्तरशतोपनिषद्भाष्ये मुक्तिचन्द्रिका समाप्ता ॥

मुण्डकोपनिषद्

22 copies : in Grantha (10, 13, 14, 15, 16, 17, 18, 32, 35), Telugu (36, 37, 43, 43, 48), Śāradā (58, 59, 60), and Devanāgarī (90, 95, 102, 108, 114).

No. 8 begins :

यद्ब्रह्माश्रित्य वर्तते विद्याविद्ये महाभ्रमे ।
तदपश्न(!)वसंसिद्धं तदहं परमाक्षरम् ॥ ओं भद्रं, etc.

Bhāṣya by Śaṅkarācārya.

3 copies: in Grantha (12, 17, 35).

Bhāṣya by Ānandatīrtha.

1 copy: in Nandināgarī (55).

Bhāṣya by Appayadīkṣita.

1 copy: in Grantha (11).

Begins:

नत्वा श्रीसुन्दराचार्यं प्रसन्नमुखपङ्कजं ।
मुण्डकोपनिषद्भाष्यं संग्रहाद्रचयाम्यहम् ॥

भद्रं कर्णेभिरित्यादिशान्तिः । **ब्रह्मा** हिरण्यगर्भः **देवाना**मिन्द्रादीनां **प्रथमः** पूर्वकः गुणैः प्रधानो वा सुबभूव यः कश्चन जीव एव प्रबलतरज्ञानकर्मसमुच्चयानुष्ठानैः **विश्वस्य** समस्तस्य प्रपञ्चस्य **कर्ता** ।

Ends:

नमः परमऋषिभ्य इति द्विर्वचनं विद्यापारम्पर्यक्रमद्योतनार्थं भूयो नमस्कारादरार्थं च भवतीत्यवगन्तव्यम् ॥

इत्यप्पयशिवाचार्यकृतौ मुण्डकोपनिषद्भाष्यं समाप्तम् ॥

Bhāṣya by ?

1 copy: in Bengālī (62).

Begins:

ओं भद्रं, etc. । **ओं ब्रह्मा देवाना**मित्याद्याथर्वणोप * * * विद्यासंप्रदायकर्तृत्वपारम्पर्यलक्षणसंबन्धमादावेवाह । स्वयमेव शास्त्रार्थे एवं हि महद्भिः परमपुरुषप्रार्थनसाधनत्वेन गुरुणा व्यासेन, etc.

Breaks off:

उच्छेदनसामान्याच्छरीरं **वृक्षं परिषस्वजाते** । परिष्वक्तवन्तौ सुपर्णाविवैकं वृक्षं फलोपभोगार्थं अयं हि वृक्षं * * * * (III, 1, 1).

मुद्गलोपनिषद्

1 copy, in Devanāgarī (119), with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya :

यस्यां पुरुषसूक्तार्थप्रपञ्चोत्पत्तिनिर्णयौ ।
स्तो मुद्गलोपनिषदं व्याख्यास्ये तामिमां शुभाम् ॥

ननु विष्णोः प्रथमया संहितया देशतो व्याप्तिर्द्वितीयया कालतो व्याप्तिरित्येतद्वाक्यद्वयमनुपपन्नम् । कुतः ॥

End :

नैष दोषः । शिष्याय दक्षिणे कर्णे इत्युक्त्या एकस्मै शिष्याय सकृदुपदेशमात्रस्य प्रतिषिद्धत्वात् ॥ इति सुन्दरेश्वर . ....समाप्तम् ॥

मृत्युलाङ्गूलोपनिषद्

Published by Colonel Jacob in the Indian Antiquary of 1887 (p. 287). The name मृत्युलाङ्गलोपनिषद् chosen by Jacob and Deussen is in none of our three MSS. (Dev., 112, 113, 113) the first of which contains the complete text, the others consisting of the Mantra only (up to विश्वरूपं नमो नमः) followed, however, by a *Bhāṣā-vyākhyā.*

Beginning of the Vyākhyā :

अथ मृत्युलाङ्गूलउपनिषतका अर्थ लिष्यते ॥ मृत्युलाङ्गूल अर्थ यहजो स्तुति जमराजकी है मृत्युकालका समा अंत आयुर्बलका जो है तिसकी प्रक्ष्याकेन मित यह है अनुष्टुप् छन्दः, etc.

End :

विश्वरूप अक्षर भूलैतोती नदिनमे (॰मै) मृत्यु या वै नमो नमः अक्षर भूलैतो उसी समै मृत्यु य वै ॥ इति मृत्युलाङ्गूलउपनिषद अथर्वणवेदकी भाषा समाप्तम् (संपूरणम्) ॥

मैत्रायणीयोपनिषद्

Called also मैत्रायणोपनिषद्, मैत्रायण्युपनिषद्, मैत्र्युपनिषद्, मैत्रायणीयब्राह्मणोपनिषद्, and मैत्रेयोपनिषद्, (मैत्रेय्युपनिषद्?) and thus confounded by Aufrecht with the two following texts.

A. Northern Recension (seven Prapāṭhakas).

3 copies: in Devanāgarī (88, 93, 100).

Dīpikā by Rāmatīrtha.

1 copy : in Devanāgarī (100).

B. Southern Recension.

I. Six Prapāṭhakas answering to Prap. I–VI, 8 of A. Printed in the editions of the 108 Upanisads.

1 copy : in Telugu (48).

II. Four Prapāṭhakas answering to Prap. I–V of A.

5 copies: in Grantha (13), Telugu (37), and Devanāgarī (74, 96, 117).

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins:

वैराग्यबोधौ प्रोच्येते यस्यां सम्यग्विमुक्तिदौ ।
श्रुतिं मैत्रायणीसंज्ञां व्याख्यास्ये सरसामिमाम् ॥

ननु **शरीरमशाश्वतं मन्यमानस्य** कुत एवमादित्येक्षणपूर्वकतपोऽनुष्ठानं देहाभिमानवतो विरक्तस्य हि सगुणदेवताप्रसादार्थकतपश्चरणं स्यात् । अत्रोच्यते नायं दोषः ॥

Ends:

अनेन जीवेनात्मनानुप्रविश्येति चैवमादिश्रुतिभ्यस्तस्यैवाधाराधेयत्वयोरुभयोरप्यवगम्यमानत्वाददोष इति । तथा चात्रोपसंहारे ऽवगम्यते । **असावात्मान्तर्बहिश्चेति** द्विरुक्तिरुपनिषत्समाप्तिद्योतनार्था ॥ इति श्रीमत्सुन्दरेश्वर........समाप्तम् ॥

मैत्रेयोपनिषद् (I)

A. Northern Recension.

1 copy: in Devanāgarī (89).*

Begins:

अथ भगवान्मैत्रेयः कैलासं जगाम । तं गत्वोवाच । भो भगवन्महादेव परमतत्त्वरहस्यमनुब्रूहीति ।

Ends:

जाग्रन्निद्राविनिर्मुक्ता सा स्वभावस्थितिः परा । सा स्वभावस्थितिः परेति । इति श्रीयजुर्वेदे मैत्रेयोपनिषद् संपूर्णम् ॥

B. Southern Recension.

This is often called **मैत्रेय्युपनिषद्**. Here text A is but the middle one of three Adhyāyas.

3 copies: in Grantha (14), Telugu (37), and Devanāgarī (117).

---

* A second copy which I saw in Benares, had the same readings differing from B.

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins:

यत्र वैराग्यसिद्ध्यर्थं शरीरोत्पत्तिरुच्यते ।
वैराग्यसाध्यः सन्यासः तत्साध्यं चात्मवेदनम् ॥
बाह्यार्चनस्य निन्दा च हृदयार्चनसंस्तुतिः ।
मुख्यं मैत्र्युपनिषद्भाष्यमारभ्यतेऽधुना ॥

बृहद्रथ इति नामतः राजा इदं शरीरं अशाश्वतं मन्यः अनित्यं मन्यमान इत्यर्थः ॥

Ends:

अतोऽनुभूतिमीमांसाद्येषु प्रबन्धेषु प्रतिपादितपूर्वाणां अर्थानां न कोपि विरोधो मन्तव्यः । **यः श्रृणोति सकृद्वापि ब्रह्मैव भवति स्वयमि-**तीयं फलश्रुतिरर्थवादः । यद्वा भवतीत्यस्य क्रियापदस्य भविष्यदर्थो-ऽवगन्तव्यः । तृतीयोऽध्यायः ॥ सुन्दरेश्वर... ..समाप्तम् ॥

मैत्रेयोपनिषद् (II)

A fairly detailed treatise on Rudrākṣas Authorities quoted: कात्यायनीया शाखा, बौधायनशाखा, रुद्रोपनिषद्.

2 copies: in Devanāgarī (75, 92).

Beginning:

श्रीगणेशाय नमः । हरिः ओं । भद्रं कर्णेभिः । शान्तिः ३ ॥ (अथ मैत्रेयीउपनिषत्प्रारम्भः । ओं सह नाववत्विति शान्तिः ॥, 2) ओं तानि ह वा एतानि रुद्राक्षाणि यत्र यो देशः सामग्रत एतानि धारयेत् । त्रीन् लोकान्धारयति खादन्स्पृशन् रसयन् (so 1; अश्नन्, 2)

जपन्नुन्मिषन्निमिषन्विण्मूत्रं कुर्वन्सर्वाण्येनांसि तरति रुद्रो भूत्वा रुद्रो भवति ।

End:

तानि वा एतानि रुद्राक्षाणि यत्र यत्र यो वेद धारयन्ति (so) यस्तानि धारयते (धारयेत्, 2) गच्छन् तिष्ठन्स्पृशन्वादन्नुन्मिषन्निव सर्वान्येनांसि तरति रुद्रो भूत्वा रुद्रो भवतीत्यादिरुद्रोपनिषत् ॥ ओं (सह नाववितिवति) शान्तिः ॥ (इति) मैत्रेयोपनिषत्समाप्ता (मैत्रेयुपनिषत्समाप्ता) ॥

मैत्रेय्युपनिषद्

See मैत्रेयोपनिषद्.

यज्ञोपवीतोपनिषद्

Another little work like Ācamanopaniṣad, belonging to the Vaiṣṇava ceremonial.

1 copy: in Grantha (11). Incorrect.

Begins:

यज्ञोपवीतोपनिषत् । यज्ञोपवीती धृतचक्रधारी यो ब्रह्मविदो मनीषी, etc.

Ends:

तस्माद्वैकुण्ठं [गच्छति] न पुनरागमनं सालोक्यसारूप्यसामिप्यसायुज्यं गच्छति य एवं वेद इत्युपनिषत् ॥

याज्ञवल्क्योपनिषद्

Corresponds to Jābālopaniṣad, sections 4–6, with an addition of 24 Ślokas.

2 copies: in Telugu (52) and Devanāgarī (120).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (120).

Begins:

सन्यासोचितवैराग्यबोधद्वारात्मदर्शनम् ।
यत्रोच्यते याज्ञवल्क्यश्रुतिर्व्याख्यास्यते ऽधुना ॥

नन्विहादौ **भगवन् सन्यासमनुब्रूहीति** याज्ञवल्क्यं पृच्छन्नपि जनकः सम्यक् **सन्यासलक्षणानि** शृण्वन्नप्यादेहपातान्न तमाश्रमं कुतः स्वीचकार ॥

Ends:

प्रत्यक्परैक्यं **पारहंस्यं** तदेव **परं पदं यतीनामुपादेयं** नान्यदिति ॥
इति सुन्दरेश्वर........समाप्तम् ॥

याज्ञवल्क्योपनिषद्

See जाबालोपनिषद्.

योगकुण्डल्युपनिषद्

4 copies: in Grantha (30, 33), Telugu (52), and Devanāgarī (120).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (120).

Begins :

अखण्डब्रह्मसंयोग आत्मनो यत्र कथ्यते ।
सैषा व्याख्यास्यते योगकुण्डल्युपनिषत्परा ॥

संज्ञा अर्थः रूढीतरेति यावत् । अकाले परब्रह्मणि दिनतः दिनस्योत्पद्यमानत्वाद्धेतोः प्रतिपदिति वस्तुसंशयात्मिका दृष्टिः ॥

Ends :

तयोर्ह्यध्याययोरुक्तार्थों हि योगशिखायां योगचूडामण्यां योगतत्त्वे ऽन्यासु चोपनिषत्सु बहुश उक्ताः केवलहठयोगविषयाः । मन्दाधिकार्युपयुक्ताः स्पष्टार्थाश्च अतः पिष्टपेषणादिव च तद्व्याख्यायामुपरताः स्मः ॥ इत्यप्पयदीक्षिताचार्य............समाप्तम् ॥

योगचूडामण्युपनिषद्

1 copy : in Devanāgarī (118), with the *Bhāṣya by Appayadīkṣita.*

Beginning of the Bhāṣya :

आसनादिषडङ्गानि प्रोच्यन्ते यत्र योगिनाम् ।
हिताय क्रियते व्याख्या योगचूडामणिश्रुतेः ॥

नन्वयं षडङ्गयोगश्च परिच्छिन्नप्रत्यगात्मज्योतिर्विषयक एवावगम्यते। नत्वपरिच्छिन्नपरब्रह्मविषयकः । कुतः ।

End :

तस्मात्प्रत्याहारोपरितनामपि धारणां सम्यक् तदनुष्ठानपूर्वकं परित्यज्य ध्यानमथ तद्वत्समाधिं चाचरेदित्यवगन्तव्यम् ॥ इति श्रीसुन्दरेश्वर ....समाप्तम् ॥

योगतत्त्वोपनिषद्

A. Shorter Recension.

13 copies: in Telugu (39, 49), Kanarese (54), Śāradā (59), and Devanāgarī (76, 77, 77, 78, 90, 93, 103, 109, 114). No. 3 ends: इति योगसारे योगरहस्ये तत्त्वोपनिषत्समाप्ता ॥

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Longer Recension.

This seems to be confined to the South. It begins with the two first verses of A, adds 127 new Ślokas, and concludes with the complete smaller text omitting only the last verse but one.

2 copies: in Grantha (14) and Devanāgarī (118).

Bhāṣya by Appayadīkṣita.

2 copies: in Grantha (63) and Devanāgarī (118).

Beginning:

परस्परविरुद्धे ते प्रोच्येते सिद्धिमुक्त्यपि ॥
योगतत्त्वोपानिषदं व्याख्यास्ये तामिमां शुभाम् ॥

अत्र योगशिखोपनिषत्प्रोक्ताः श्लोका बहवो भवन्ति । प्रायेण तस्या अस्याश्च भेदाभावे ऽपि वज्रोल्यादयः केचन सिद्धिविशेषा जीवन्मुक्तस्य स्वच्छन्दमरणादिविशेषार्थाश्चावगम्यन्ते ।

End:

यदात्ममात्रेणावशिष्टमित्यनुक्तं तदा हठयोग्येव प्रकृत इति वक्तुं युक्तं । तथोक्तत्वात्तु ज्ञानयोगी जीवन्मुक्त एव प्रकृत इति स्थितम् ॥ इति श्रीमत्सुन्दरेश्वर.... ....समाप्तम् ॥

योगराजोपनिषद्

This Upaniṣad describes the so-called *Laya-Yoga* which consists in meditating on the nine Cakras or mystic circles (*brahma-cakra, svādhiṣṭhāna, nābhi-cakra*, etc.).

1 copy: in Devanāgarī (66).

Begins:

ओं । योगराजं प्रवक्ष्यामि योगिनां योगसिद्धये ।
मन्त्रयोगो लयश्चैव राजयोगो हटस्तथा ॥*

Ends:

ऊर्ध्वशक्ति निपातेन अधःशक्तेर्निकुञ्चनात् ।
मध्यशक्तिप्रबोधेन जायते परमं सुखम् ।
जायते परमं सुखमिति । इति योगराजोपनिषत्समाप्ता ॥

योगशिखोपनिषद्

A. Northern Recension.

6 copies: in Śāradā (59) and Devanāgarī (77, 81, 103, 109, 114). In No. 3, verses 1–5a are replaced by Brahmavidyopaniṣad 1–3a.

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Southern Recension.

Text A is here incorporated in the first Adhyāya (Ślokas 69b-78b). The whole consists of six Adhyāyas containing 392 Ślokas.

2 copies: in Telugu (52) and Devanāgarī (119).

* Compare Yogatattvopaniṣad, southern recension.

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (119).

Begins:

सिद्धिमुक्तिप्रदौ मार्गौ प्रदश्येते यया स्फुटौ ।
व्याख्यास्ये तामिमां योगशिखोपनिषदं पराम् ॥

इहादौ सर्वेषां देवानां कथं मुनिरिति हिरण्यगर्भकर्तृकः प्रश्नः । सुतरामसङ्गतो भवति । कुतः स्वार्थस्यैव प्रष्टव्यत्वाज्जीवानां केषाञ्चिदाधिकारिकत्वेन जीवन्मुक्ततया सर्वशब्दार्थवत्त्वाभावाच्च । अत्रोच्यते ॥

Ends:

एवं सर्वार्थसारोपदेशैः संसारार्णवतारकं कर्णधारवदवस्थितं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढं विश्वस्याभ्यासवासनाशक्त्याहं ब्रह्मास्मीत्यनुस्यूतशब्दानुविद्धसमाधियोगाभ्यास वासनाबलेन संसारसागरं तरतीति सर्वं समञ्जसतरमवगन्तव्यम् ॥ इति श्री सुन्दरेश्वर........समाप्तम् ॥

रहस्योपनिषद्

See शुकरहस्योपनिषद्.

रामपूर्वतापिन्युपनिषद्

10 copies: in Grantha (21, 21), Telugu (40, 46), Sāradā (59), and Devanāgarī (87, 103, 109, 114, 118).

Ṭīkā by Viśveśvara.

See Government Oriental MSS. Library, Madras, No. 762.

1 copy: in Devanāgarī (64). After the colophon there are the following verses:

निर्गुणाप्तिकरीत्यादौ सगुणोपास्तिरीरितः ।
तस्याश्च मन्त्रसाध्यत्वाद्विहितस्तज्जपः पुरा ॥
मन्त्रार्थस्तु द्वितीयस्यां तृतीयोपनिषद्यपि ।
तुर्यायां कथितं मन्त्रं पञ्चम्यां तु प्रपूजनम् (so) ॥
तथाख्यानान्मया रामः पूजितं (!) प्रीयतां सदा ॥

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (118).

Begins:

रामस्य ब्रह्मता यस्यां स्फुटमेवाभिधीयते ।
निश्श्रेयसकरीमेनां व्याख्यास्ये रामतापिनीम् ॥

ननु राक्षसमरणकर्तृत्वाद्रामस्य रामनामेत्युपपन्नमेतत् ॥

Ends:

तस्माद्विजातीयप्रत्ययतिरस्कारपूर्वकदृश्यानुविद्धसमाध्यारूढः सद्यो-मुमुक्षुः सजातीयप्रत्ययप्रवाहात्मकशब्दानुविद्धसमाधिमेव श्रीरामस्वरूप-भजनं कुर्यादिति ॥ इति श्रीसुन्दरेश्वर........समाप्तम् ॥

रामरहस्योपनिषद्

Called also हनुमदुपनिषद् and हनुमदुक्तरामोपनिषद्, but not in the South, as it seems.

A. Northern Recension.

Published by Weber in 'Abhandlungen der Koenigl. Akademie der Wissenschaften zu Berlin' of 1864.

1 copy: in Devanāgarī (70). Incorrect. Begins like B.

Ends:

अष्टौ सहस्राणि श्लोकाश्चतुर्विंशतिसहस्राणि पद्यानि दशसहस्राणि दंडक (!) इति चामनुक्त (!) मां ज्ञात्वा कृतकृत्यो भवेदिति इति हनुमदुपनिषत् समाप्तम् ॥

B. Southern Recension.

Consists of five Adhyāyas the first of which is about the same as A, apart from the end.

1 copy, in Devanāgarī (118), containing Adhyāyas I and II only, with the *Bhāṣya by Appayadīkṣita* on the same.

Beginning of the Bhāṣya:

श्रीराममन्त्राः सर्वे च यस्यामेव समुद्धृताः ।
व्याख्यास्ये तामिमां रामरहस्योपनिषद्गिरः ॥

नन्विह श्रीरामो ब्रह्मतारकमित्युक्तं अत्र ब्रह्मतारकमित्युक्तिमात्रेण चारितार्थ्याच्छ्रीरामशब्दो नावश्यकः ।

End:

तस्मात्सर्वज्ञे हनूमत्यात्मप्रशंसाकर्तृत्वादिदोषो न गन्धमात्रो ऽपि शङ्क्यः ॥ श्रीमत्सुन्दरेश्वर........समाप्तम् ॥

रामोत्तरतापिन्युपनिषद्

9 copies: in Grantha (21), Telugu (40, 46), Śāradā (59), and Devanāgarī (87, 91, 103, 109, 114). A sixth Khaṇḍa (see Poona ed.) is added in Nos. 1, 2, 3, and 6.

Tīkā called Ānandanidhi, by Ānandavana.

See Weber, 'Handschriftenverzeichnis,' vol. V, No. 2131.

1 copy: in Devanāgarī (64).

रुद्रहृदयोपनिषद्

2 copies: in Devanāgarī (88, 120), the second one with the *Bhāṣya by Appayadīkṣita.*

Beginning of the Bhāṣya:

रुद्रोमात्मकता सर्वजगतो यत्र कथ्यते ।
व्याख्यास्ये तामिमामद्य श्रीरुद्रहृदयश्रुतिम् ॥

नन्विह **सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनमित्यारभ्य** निर्विशेष-परब्रह्मात्मैक्यस्याप्यवधारितत्वेनोत्तमाधिकारिविषयत्वावगमादुपक्रमे रुद्रोमैक्यस्य रुद्रविष्ण्वैक्यस्य ब्रह्मविष्णुरुद्रैक्यस्य सर्वदेवान्तरैक्यस्य वा प्रतिपादनमनावश्यकमेव भवति । इत्याशङ्कायामिदमुच्यते ॥

End:

प्रेतसादृश्यं तु सर्वाशनविनिर्मुक्तस्य निष्प्रतियोगिकस्य निराकार-ब्रह्मण इति तन्नेह विवक्षितं तस्मात् श्रुत्युक्तम् सर्वमनवद्यमवगन्तव्यम् ॥
इति सुन्दरेश्वर........समाप्तम् ॥

रुद्राक्षजाबालोपनिषद्

A. Northern Recensions.

3 copies: in Grantha (7), Telugu (48), and Devanāgarī (115). For Nos. 1 and 3 compare Bṛhajjābālopaniṣad, A. No. 2 (being the same as No. 773 of the Government Oriental MSS. Library, Madras) consists of a portion of the printed text of Rudrākṣajābālopaniṣad (Bombay ed., p. 763a^{8}–764a^{1}) *plus*

p. $12b^2$-$13a^2$ and the concluding section of MS. IX G 53 (above, page 115).

B. Southern Recension.

1 copy, in Devanāgarī (120), with the

Bhāṣya by Appayadīkṣita.

Beginning of the Bhāsya:

रुद्राक्षोत्पत्तिमाहात्म्ये प्रोच्येते यत्र शम्भुना ।
सैषा व्याख्यास्यते मुक्त्यै रुद्राक्षोपनिषन्मया ॥

अत ऊर्ध्वं धारणे फलमित्यर्थः । **वक्तुं न शक्नोमीत्युक्त्या** मुक्तिरेव संसारबन्धात्फलमभिप्रेतं स्यात् ॥

End:

आब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यत ॥

इति स्मृतेः ब्रह्मभवनं गतस्याप्यवगम्यमाना पुनरावृत्तिः सगुणमुक्तस्येत्यतो रुद्राक्षधारणं निर्गुणब्रह्मोपासनाङ्गमिति स्थितं ॥ इति सुन्दरेश्वर ....समाप्तम् ॥

रुद्राथर्वशिरस्, etc.

See अथर्वशिरउपनिषद्.

रुद्रोपनिषद्

This Upaniṣad enjoins the necessity of Śiva-bhakti (without which a Brāhmaṇa becomes a Caṇḍāla, and *vice versā*) and of the bearing of the sacred ashes, the phallus, and the plaits.

1 copy: in Devanāgarī (92). Most corrupt.

Begins:

श्रीगणेशाय नमः । ओं रुग्वेदोपनिषत् (!) ॥

ओं विश्वमयः ब्राह्मण शिवः वृजति ब्रांह्मणयं चाक्षरानुभवति (so) ॥

Ends:

निरासनं शिवनिरसनं आनन्दपरायणः तस्माच्छिववृजंतु गुरुवृजन्तु (!) ॥ इत्यवपावनं रुद्रोपनषित्समाप्तः (!) ॥

लघुजाबालोपनिषद्

See जाबालोपनिषद्.

लाङ्गूलोपनिषद्

Contains a number of Mantras (with *aṅga-nyāsa* and *kara-nyāsa*) for the worship of Hanumān.

1 copy in Devanāgarī (65).

Begins:

श्रीगणेशाय नमः । श्रीसीतारामचन्द्राय नमः । श्रीहनुमद्राय० (!) । ओं अस्य श्री अनन्तघोरं प्रलयज्वालाग्निरौद्रस्य वीरहनुमान् असाध्यसाधन अघोरास्त्रयो मूलमन्त्रस्य ईश्वर ऋषिः श्रीरामलक्ष्मणो देवता, etc.

Ends:

अथर्वणवेदसिद्धि कुरु २ स्वाहा श्रीरामचन्द्र उवाच श्रीमहादेव उवाच श्रीवीरभद्रस्तौवाच त्रिसन्ध्यं यः पठेन्नरः श्रीअथर्वणरहस्ये लाङ्गूलोपनिषत्समाप्तः ॥ (so!).

लिङ्गोपनिषद्

On the necessity (enjoined by a certain class of Śivaits) of bearing the Liṅga. This text is evidently the same as the **लिङ्गधारणोपनिषद्** described under No. 774 of the Government Oriental MSS. Library, Madras.

1 copy: in Devanāgarī (111). Very incorrect.

Begins:

श्रीगणेशाय नमः । श्रीगुरुनाथाय नमः । श्रीबसवाय (!) नमः ॥ ओं धर्मजिज्ञासा ज्ञानबुद्धिश्च ज्ञानात् मोक्षकारणम् ।

Ends:

मोक्षमेव धारणं विद्यात् । उशंतीव मातरं कुर्यात् । ओं तत्सदिति लिङ्गोपनिषत्समाप्त इत्येवं वेदेत्युपनिषत्समाप्त (!)॥

वज्रसूच्युपनिषद्

A. Northern Recension.

8 copies, in Devanāgarī (77, 97, 97, 97, 97, 108, 112, 114).

This recension called, in most MSS., **श्रीशङ्कराचार्यविरचिता वज्रसूच्युपनिषत्[सुबोधिनी]** and published (with insufficient material) by Professor Weber in the 'Abhandlungen der Koenigl. Akademie der Wissenschaften' of 1859, consists of the following three parts (prop., 5: 7: 4):

(1) What does not and what does make a Brāhmaṇa.

Beginning:

ओं वज्रसूचिं प्रवक्ष्यामि........को वा ब्राह्मणो नाम । किं जीवः ।

किं देहः । किं जातिः । किं वर्णः । किं कर्म । किं पाण्डित्यं । किं धर्म । किं धार्मिकं । इत्यष्टौ विकल्पाः । In some MSS. the order of the questions is different; one copy (No. 5) has दातारः for धर्म, and another one (No. 6) ज्ञानं for धार्मिकं (धार्मिकः).

(2) *What mokṣa is not and what it is.*

Begins:

अत एव ब्रह्मविदेव ब्राह्मणो नान्य इति निश्चयः । कर्मयोगी च विद्वांसो अन्तरालं सुरालयं (स्वरालयं)........(five Ślokas)........ आत्मना पूरितं सर्वं महाकल्पाम्बुना यथा ॥ ९ ॥ केचिद्वदन्ति सावयववस्तुज्ञानं मोक्षः (so 5 and 8);....... केचिद्वदन्ति साकारस्य विनाशो ऽस्ति निराकारस्य शून्यतोभयपक्षविहीनस्तु (°विहीनं वस्तु) मोक्षः (1 and 6); etc., etc., there being a confounding variety of readings in this part.

(3) *The mahāvākya explained.*

Ends:

ज्ञात्वाप्यसर्पसर्पो ऽयं (°सर्पपस्य ! 1; °सर्पोर्थो, 4) यथा कम्पं न मुञ्चति । विध्वस्ताखिलमोहो ऽपि मोहकार्यं तथात्मनि (°वित्, 1; °वत्, 2; लोककार्यं तनोति आत्मवित्, 6). No. 5 adds: यथा रज्जुस्वरूपे संज्ञाते सर्पज्ञानं निवर्तते । तथापि भयजनितं कम्पादिकं वर्तते. Colophons: इति श्रीशङ्कराचार्यविरचितं वज्रसूच्युपनिषत् संपूर्णं (6 and 7);........वज्रसूचिकोपनिषत्समाप्तं (5);...... °विरचितायां वज्रसूच्यां उपनिषत्सुबोधिन्यां (!) समाप्तम् (1); इति श्रीवेदान्तसारे वज्रसूचिरुपनिषत्संपूर्णं (2); इति श्रीवज्रसूची उपनिषत्संपूर्णं (3); इति वज्रसूच्युपनिषत्समाप्तिमगमत् (4).

B. Southern Recension.

5 copies : in Grantha (14), Telugu (40, 49), and Devanāgarī (79, 117).

This is identical with the first part of A, but there are only six questions here, viz., किं जीवः । किं देहः । किं जातिः । किं ज्ञानं । किं कर्म । किं धार्मिक इति । (........किं धर्मः । किं कर्मेति ।, 2 and 3), except in 5 which adds किं वर्णः । किं पाण्डित्यमित्यष्टौ प्रश्नाः ।

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins :

यत्र प्रश्नाष्टकद्वारा ब्राह्मणत्वविनिर्णयः ।
वज्रसूच्यभिधामेतां व्याख्यास्ये श्रुतिमादरात् ॥

वज्रसूचीमिति । **ब्रह्मज्ञानहीनानां दूषणं ज्ञानं चक्षुर्येषां तेषां भूषणं** अज्ञानपर्वतस्य **भेदनं** अत एव **शस्त्रं** वज्रायुधमिव स्थितं **वज्रसूचिं** वज्ररचितसूचिमिव स्थितां वज्रसूच्याख्योपनिषदमित्यर्थः **प्रवक्ष्यामि** ।

Ends :

आत्मानं सच्चिदानन्दं ब्रह्म भावयेदित्यभ्यास उपनिषत्परिसमाप्तिद्योतनार्थः ॥ इति सुन्दरेश्वरतात. ......समाप्तम् ॥

Vyākhyā by the same. (Devanāgarī, 120).

This is an unfinished enlargement of the work just described.

Begins :

श्रीगणपतये नमः । अविघ्नमस्तु ॥
आत्मानात्मविवेकं गुरुशिष्ययोः उत्तरात्तरमाह ।

Breaks off:

अस्मिन् विषये दोषदृष्टिं कृत्वा पुनः पुनः समाधिः । श्रद्धा नाम गुरुवेदान्तपः (so) ।

C. Vajrasūci by Aśvaghoṣa.

Though seemingly an independent work, this is, in fact, nothing but a Buddhist commentary on or elaboration of the first part of Vajrasūcyupaniṣad, with many quotations from Śruti and Smṛti.

1 copy: in Devanāgarī (112).

Begins:

जगद्गुरुं मञ्जुघोषं नत्वा वाक्कायचेतसा ।
अश्वघोषो वज्रसूचीं सूत्रयामि यथामतम् ॥१॥
वेदः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणं ।
यस्य प्रमाणं न भवेत्प्रमाणं कः तस्य कुर्याद्वचनं प्रमाणं ॥२॥

इह भवता यदिष्टं सर्ववर्णप्रधानं ब्राह्मणवर्ण इति । वयमत्र ब्रूमः । को ऽयं ब्राह्मणो नाम । किं जीवः । किं जातिः । किं शरीरं । किं ज्ञानं । किमाचारः । किं कर्म । किं वेद इति ।

Ends:

अस्माभिरुक्तं यदिदं द्विजानां मोहं निहन्तुं हतबुद्धिकानां ॥
गृण्हन्तु सन्तो यदि युक्तमेतत् मुञ्चन्त्वथायुक्तमिदं यदि स्यात् ॥

कृतिरियं सिद्धाचार्याश्वघोषपादानामिति ॥

Vajrasūcī-laghuṭanka.

A Brahmanical refutation of the above (abbreviated from a larger work?) by Paṇḍit Subajee Bapoo (see Weber who published the Vajrasūcī together with the Upaniṣad, loc. cit.).

1 copy: in Devanāgarī (112).

Begins:

ब्रह्मण्यदुष्टदमनं सत्पतिं जगदीश्वरं ।
नत्वा सद्युक्तिटङ्केन वज्रसूचीं भिनद्म्यहम् ॥

वेदाश्च भिन्नाः स्मृतयश्च भिन्नास्तथा मुनीनां मतयश्च भिन्नाः ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्था ॥

Ends:

इति श्रीहरिहरद्वयसुश्लोकचरणादिघटितसुवर्णादिनाम्ना समस्तब्राह्मणाविद्वन्मण्डलीशिष्येण विरचितो वज्रसूचीलघुटंकः समाप्तः ॥

वराहोपनिषद् (I)

Well described under No. 783 of the Govt. Or. MSS. Library, Madras.

1 copy, in Devanāgarī (120), with the

Bhāṣya by Appayadīkṣita.

Beginning of the Bhāṣya:

सारात्सारतरानुभूतिमदतिश्लाघ्या श्रुतिर्दुर्लभा
सर्वासूपनिषत्सु केवलचिदानन्दानुभूतिप्रदा ।
जीवन्मुक्तिविदेहमुक्तिविषया भेदा ययैव स्वयं
साध्या संविशदीकृताश्च सरलाप्युक्तया दुरूहार्थतः ॥

इह खलु निष्प्रतियोगिकशुद्धचैतन्यविवर्तचिच्छक्तिविलासपरिणतसच्चिदानन्दघनीभूतदिव्यमङ्गलविग्रहायमानो भगवान्, etc.

End:

एवं यत् कृपयैव साधुरचिता लोकोपकाराय च
व्याख्येयं गुरवे नमोऽस्तु सततं श्रीसुन्दरेशाय नः ॥

इति श्रीमत्सुन्दरेश्वरतातपादशिष्याप्पयशिवाचार्यकृतौ वराहमञ्जूषायां पञ्चमो ऽध्यायः ॥

वराहोपनिषद्भाष्यं समाप्तं ॥ श्रीसुन्दरेश्वरसद्गुरुचरणारविन्दाभ्यां नमः ॥

वराहोपनिषद् (II)

An Ūrdhvapuṇḍra-vidhi * taught Sanatkumāra by Viṣṇu as a boar. This is an enlarged Ūrdhvapuṇḍropaniṣad (see above, p. 148) which is itself a somewhat longer version of the Varāhopaniṣad described under No. 785 of the Govt. Or. MSS. Library, Madras.

1 copy: in Grantha (28). Very faulty.

Begins:

अथ श्रीवराहरूपिणं भगवन्तं प्रणम्य ब्रह्मपुत्रः सनत्कुमारः पप्रच्छ । अधीहि भगवन्नूर्ध्वपुण्ड्रविधिं ।

Ends:

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुरे । य एवं वेदेत्युपनिषत् ॥ हरिः ओं ॥ इति वराहोपनिषत्समाप्ता ॥

वनदुर्गोपनिषद्

A very lengthy collection of Mantras, Dhyānas, Stavas, Pūjās, etc., mostly engaged with Durgā (whose name Vindhya-nivāsinī may be meant by Vanadurgā), but containing also a Viṣṇu-pūjā, a Rudra-

* Compare Vāsudevopaniṣad.

gāyatrī, a Garuḍa-mantra, and even a complete, accentuated Allopaniṣad.

1 copy: in Devanāgarī (102).

Begins:

श्रीगणेशाय नमः ॥ ओं अस्य श्रीवनदुर्गामहाविद्यामन्त्रस्य किरातरूपधर ईश्वर ऋषिः । अनुष्टुप् छन्दः । अन्तर्यामी नारायण ईश्वरो वनदुर्गा गायत्री देवता । दुं बीजं । स्वाहा शक्तिः । क्लीं कीलकं ।

Ends:

कलामध्यगतो जीवो जीवमध्यगता परा ।
जीवः परः परो जीवो सर्वं ब्रह्मेति भावयेत् ॥

ओं शान्तिः शान्तिः शान्तिः । हरिः ओं ॥ इति श्रीअथर्वणरहस्ये वनदुर्गोपनिषत्समाप्तः ॥

वाजसनेयसंहितोपनिषद्

See ईशोपनिषद्.

वासुदेवोपनिषद्

Edited by Colonel Jacob in "Eleven Ātharvaṇa Upaniṣads."

6 copies: in Telugu (37, 40, 48, 50) and Devanāgarī (107, 118).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (118).

Begins:

ऊर्ध्वपुण्ड्रविधिर्यस्यां प्राधान्येन प्रदृश्यते ।
वासुदेवोपनिषदं व्याख्यास्ये तामिमां स्फुटम् ॥

इह ब्राह्मणेषु केचित् स्मार्ताः गोपीचन्दनोर्ध्वपुण्ड्रमचक्रसंयुक्तं दधते अन्ये तु माध्वाः चक्रसंयुक्तं दधते ।

Ends:

तत्तत्स्थानगोपीचन्दनधारणपूर्वकत्वमावश्यकमित्यवगन्तव्यम् ॥

इति श्रीसुन्दरेश्वर........समाप्तम् ॥

विश्रामोपनिषद्

Called also **मनोविश्रामोपनिषद्, विश्रान्तोपनिषद्, वेदान्त-विश्रान्तोपनिषद्.** It constitutes the concluding section of Sankarācārya's Saṃnyāsa-grahaṇa-paddhati which has itself the sub-title Vedāntaviśrāntopaniṣad. The complete text (beginning: **पूर्वदले श्वेतवर्णे,** etc.) is printed on page 78 of the third volume of the Descriptive Catalogue of the Calcutta Sanskrit College.

3 copies, in Devanāgarī (69, 100, 116).

विष्णूपनिषद्

See **नारायणोपनिषद्.**

वृद्धजाबालोपनिषद्

1 copy: in Grantha (7).

This is the same as जाबाल्युपनिषद् up to line 13 of the Bombay ed. (108 Up.). Then it goes on: ...... स्वामिबध्यमाना गवादयः पशवः तत्स्वामिनः पतय एवमिदमहंता स्व-रूपानभिज्ञाः सर्वज्ञेश्वरप्रेर्या जन्मादिसंयुक्ताः संसारदुःखनिमग्ना स्वस्व-

कृतसुकृतदुष्कृतकर्मणा परमेश्वरप्रेरणया बद्धाः संसारिणो जीवास्तत्तत्सुकृतदुष्कृतकर्मद्वारा स्वर्गनरकप्रदानादीनां तन्नियामकः परमेश्वरः पतिः, etc., and there follows a kind of catechism of the Pāśupata philosophy, in which the following questions are treated :

(1) कथमेति (!) जीवा अहङ्काराविष्टाः कुतः पशव इति ।

(2) को ऽयमहङ्कार इति ।

(3) किं वा स्वस्वरूपमिति ।

(4) कानि पञ्चकृत्यानि तत्संपन्न ईशः कीदृगिति ।

(5) कानि षड्विंशत्तत्त्वानीति ।

(6) कीदृशो जीवः कीदृगस्य शरीरं कथमुत्पद्यत इति ।

(7) को योग इति ।

(8) तस्यैव [योगस्य] क उपाय इति ।

(9) कथं परमेश्वराराधनं को नियमः को विधिरिति ।

(10) किं भस्म किं रुद्राक्षमिति ।

(11) किं भासयति किं भर्त्सयतीति ।

(12) कथं भस्मोत्पत्तिरिति ।

(13) कथं रुद्राक्षाणि धर्तव्यानीति ।

The Upaniṣad then closes as follows :

एतामुपनिषदं जाबालिकः पैप्पलादायोपदिदेश । पैप्पलादः पैठीनसाय पैठीनसः शार्ङ्गरवाय शार्ङ्गरवो ऋषिभ्यः सर्वेभ्यः । य इमां वृद्धजाबालोपनिषदमधीते स सर्ववेदाध्ययनफलवान् भवति । स सर्वक्रतुफलवान् भवति । स सर्वतपस्तापी भवति । य एनां वृद्धजाबालोपनिषदं धत्ते स शिवधारी भवति । भस्मरुद्राक्षधारी भवति । य एनां

वृद्धजाबालोपनिषदमर्चयति स सर्वदेवार्चको भवति । शिवार्चको भवति स सर्वपापविनिर्मुक्तो भवति । शिवस्वरूपमेति । शिवस्वरूपमेति ॥ इति वृद्धजाबालोपनिषत्समाप्ता ॥

वेदान्तविश्रान्तोपनिषद्

See विश्रामोपनिषद्.

शरभोपनिषद्

A. Northern Recension.

Called, as a rule, **पैप्पलादोपनिषद्**.

2 copies: in Grantha (7) and Devanāgarī (68).

Beginning:

ओं अथ (हैनं, 1) पैप्पलादो (ब्रह्मांशो, added by 1) ब्रह्माण-मुवाच । भो भो भगवन्ब्रह्मविष्णुरुद्राणां मध्ये को (वा) ऽधिकतरो ध्येयश्च तमेव (ध्येयः स्यात् तत्त्वमेव, 1) नो ब्रूहीति ।

End:

श्रीरुद्राध्यायी भवति । शिवस्य हृदयङ्गमो भवति । न च पुनरा-वर्तते न च पुनरावर्तत इत्याह भगवान्ब्रह्मा । (भद्रं कर्णेभिरिति शान्तिः, 2) इति पैप्पलादोपनिषत्समाप्ता ॥

B. Southern Recension.

1 copy: in Telugu (48).

Ends:

इत्याह भगवान्पैतामहः(!) । ओं तत्सदिति पैप्पलादब्रह्मसंवादे शर-भोपनिषत्समाप्ता ॥

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (119).

Begins:

सगुणोत्कर्षवादिन्यामप्युक्तो निर्गुणः शिवः ।
शैवश्रुतौ तु शरभश्रुतिर्व्याख्यास्यते मया ॥

यद्यपीह **ब्रह्मविष्णुरुद्राणां मध्ये कोवाधिकतरो ध्येयः स्यादि**-त्युपक्रमानुरोधेन सगुणस्य रुद्राख्यस्य शिवस्यैवाधिक्यमुपपादितं । तथापि, etc.

Ends:

तथापि व्यावहारिकेतरेतरजन्यजनकतायाश्च वास्तवत्वात्कस्यचिदपि मतवादिनः स्वान्यमतविषयकापकर्षनिर्वाहित्वं न कदाचन सेत्स्यति । तस्मादलमतिप्रपञ्चेन ॥ इति सुन्दरेश्वर............समाप्तम् ॥

शाङ्खायनोपनिषद्

कौषीतकी and several other Upanisads. See above, p. 80, 81, and compare the paper quoted.

शाट्यायनीयोपनिषद्

1 copy: in Devanāgarī (120), with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

यस्यां त्रिदण्डसन्यासः प्रोच्यते मुक्तिसाधनम् ।
शाट्यायनीयोपनिषत्सेयं व्याख्यास्यतेऽधुना ॥

अत्र खल्वथा**श्रमं चरमं संप्रविश्य** युक्ते तुर्याश्रमे त्रिदण्डादि-पञ्चमात्राभरणं यावदायुषं विधीयते ॥

End:

यस्य प्राग्गुरूपसरणाद्देवे सगुणेश्वरे **परा भक्तिर्यथास्ति** तथा **गुरौ** भवेद्यदि स सप्रतियोगिकब्रह्मापरोक्षज्ञानी प्रारब्धक्षये **परं** निष्प्रतियोगिकं ब्रह्म **प्रेयात् ब्रह्मविदा**प्नोति परमिति श्रुत्यन्तरात् ॥ इति सुन्दरेश्वर........समाप्तम् ॥

शाण्डिल्योपनिषद्

2 copies: in Telugu (52) and Devanāgarī (119), the latter with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

अष्टाङ्गयोगो यत्रोक्तः सद्योमुक्त्येकसाधनम् ।
शाण्डिल्योपनिषत्त्वेषा मुक्त्यै व्याख्यास्यते ऽधुना ॥

अत्र यमादीनां सप्ताङ्गानां तत्तद्भेदसङ्ख्यावचनानीव समाधेरप्यष्टमस्याङ्गस्य तद्भेदसङ्ख्यावचनं विना **समाधिस्त्वेकरूप** इति यदुक्तं तदयुक्तम् ।

End:

अथ यो ह वै विद्ययैनं परमुपास्ते सो ऽहमिति स ब्रह्मवित् भवतीति निष्कलब्रह्मज्ञानोदयानन्तरं तदुपास्तेरवधारितत्वादिति सर्वं समञ्जसमवगन्तव्यम् ॥ इति सुन्दरेश्वर . ... समाप्तम् ॥

शारीरकोपनिषद्

3 copies: in Grantha (4), Telugu (39), and Devanāgarī (119).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (119).

Begins:

यस्यां शारीरतत्त्वानि प्रोच्यन्ते सङ्ग्रहेण वै ।
शारीरकोपनिषदं व्याख्यास्ये तामिमामिह ॥

ननु **मनोबुद्धिरहङ्कारश्चित्तमित्यन्तःकरणचतुष्टयमत्रोक्तं** । अन्यत्र त्वन्तःकरणेन पञ्चाभिधीयन्ते ।

Ends:

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेति स्मृत्या परमात्मत्वावगमादिति चेन्न क्षेत्रज्ञं जीवात्मानं मामस्मत्प्रत्ययगोचरपरमात्माभिन्नं विद्धीत्यनन्तरविशेषणत्वेन प्रागवस्थायां जीवत्वं क्षेत्रज्ञशब्देन सिद्धमित्यवगन्तव्यम् ॥ इति सुन्दरेश्वर.... ...समाप्तम् ॥

शिवसंकल्प

Same as Vājasaneyisaṃhitā XXXIV, 1–6

1 copy: in Devanāgarī (93).

शिवाथर्वशीर्ष

See **अथर्वशिरउपनिषद्**.

शिवोपनिषद्

A compendium of Śaivāgama, consisting of seven Adhyāyas in which the following subjects are treated:

(1) Nature of bondage; spiritual Śiva worship.

(2) The Śiva-liṅga; how to build a Śiva temple.

(3) Domestic arrangements; the crystal and the earthen Liṅga.

(4) Prescripts for the Śānti-gṛha; the enclosed space for the Śiva fire; the fire libation, etc.

(5) The 'fiery bath'; the sacred ashes; the ten baths; etc.

(6) Offerings to Śiva and his devotees, and their respective merits.

(7) Rules for the life of a Śiva-bhakta.

1 copy: in Devanāgarī (103).

Begins :

कैलासशिखरासीनमशेषामरपूजितम् ।
कालघ्नं श्रीमहाकालमीश्वरं ज्ञानपारगम् ॥
संपूज्य विधिवद्भक्त्या ऋष्यात्रेयः सुसंमतः ।
सर्वभूतहितार्थाय पप्रच्छेदं महामुनिः ॥
ज्ञानयोगं न विन्दन्ति ये नरा मन्दबुद्धयः ।
ते मुच्यन्ते कथं घोरात् भगवन्भवसागरात् ॥
एवं पृष्टः प्रसन्नात्मा ऋष्यात्रेयेण धीमता ।
मन्दबुद्धिविमुक्त्यर्थं कालदेवः प्रभाषते ॥
महादेव उवाच ॥

End :

ये श्रावयन्ति सततं शिवधर्मं शिवार्थिनाम् ।
ते रुद्रास्ते मुनीन्द्राश्च ते नमस्याः स्वभक्तितः ॥
ये समुत्थाय शृण्वन्ति शिवधर्मं दिने दिने ।
ते रुद्रा रुद्रलोकेशा न ते प्रभृति मानुषाः ॥
शिवोपनिषदं ह्येतदध्यायैः सप्तभिः स्मृतम् ।
ऋष्यात्रेयसगोत्रेण मुनिना हितकाम्यया ॥
इति शिवोपनिषदि शिवाचाराध्यायः समाप्तः ॥

शिवोपनिषद्

See अथर्वशिरउपनिषद्.

शिवोपनिषत्स्तोत्र

None of the two Śivopaniṣads noticed above seems to be connected with this Stotra. The name may simply mean **शिवरहस्यस्तोत्र**.

1 copy: in Devanāgarī (105).

Begins:

ओं नमः शिवाय ॥

ओङ्कारे आदिरूपे सुकृतबहुविधे श्वेतपीते च कृष्णे ।
नीले रक्तैकपीते तदुपरि रहिते सर्ववर्णे विवर्णे ॥
प्राणापाने समाने विपरीतकरणे व्यान उदानपीठे ।
एकोव्यापी शिवो ऽयं इति वहति हरेर्नास्ति देवो द्वितीयः ॥

Ends:

ध्याने ध्याने विधाने जयविजयकरे भावभावे विभावे ।
रामे रामे ऽभिरामे अमृतविषयमये लब्धस्वर्ग(?)व्यतर्के (so) ॥
बन्धे मोक्षे चकारे निखिलरिपुमये चेत्तुचेते (so) प्रचेते एको॰ ।
इति श्रीहरिणा विरचितं शिवोपनिषत्सोत्रं संपूर्णं ॥

शुकरहस्योपनिषद्

Called also **अथर्वणरहस्योपनिषद्** and **रहस्योपनिषद्**.

4 copies: in Grantha (14), Telugu (49), and Devanāgarī (71, 117). No. 2 adds the verse:

रहस्योपनिषद्विद्यामिति ब्रह्मसुसेविताम् ।
लब्ध्वा ब्रह्मर्षयो भूयः अधिकज्ञानसिद्धये ॥

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins :

सर्ववेदान्तसारांशमहावाक्यार्थरूपकं ।
रहस्योपनिषद्भाष्यमधीत्येहैव मुच्यते ॥

अथातो रहस्योपनिषदं व्याख्यास्याम इत्याद्यया अस्या रहस्योपनिषदः **देवर्षयो ब्रह्माण**मित्यादिसंबन्धः ॥

Ends :

य इति गुरूपदेशद्वारेण **य इमां रहस्योपनिषद**मधीते स **साक्षा**-दपरोक्षतः **कैवल्यमश्नुते** प्राप्नोति पुनरुक्तिरुपनिषत्परिसमाप्तिद्योतनार्था ॥ इति श्रीमत्सुन्दरेश्वर ....समाप्तम् ॥

शौनकोपनिषद्

This is one of the four Upaniṣads of the Oupnek'hat (No. 49, called Schavank) the Saṃskṛt text of which has been looked for in vain as yet. Its contents are an account of three battles between the Devas and the Asuras which end in favour of the former through the help of the metres and the Praṇava sent by Indra.

1 copy, in Devanāgarī (93). Incorrect.

Begins :

ओं देवासुराः संयत्ता आसंस्तेषामिन्द्रो न प्रत्यपद्यत ते ह वसु(!) नेव प्रातःसवनेषु पुरोधाय व्यजिगीषंत ते ह रुन्नेषु(!) नाराशंसेषु ऋषी

णां यज्ञवास्त्वभ्या(!)यत्र हनिष्याम वा एतद्धो यद्देवात्र पराभावयिष्यथे-
ति ते ह बिभ्यत एव स्तोकानुदकल्पयन्विजेष्यध्वे वावैतानन्विति त ह
तत एवाजिमार्छैस्तानान्वितरान्पराभावयन् ततो हेन्द्रो पश्यत्स ह गार्य(!)
र्तामेव प्रतिसंदिदेश

Ends :

सप्तभिरेनं स्वारयंतीति यद्दी(!)मान् त्रीनभिधत्ते तत्रिधेति यदिंद्र
एवोद्गीथस्तद्वृषभ इति तदेतदृचा भ्यनु(!)क्तं* मरुत्त्वं(!)तं वृषभं वावृधा
स यद्रावयंति तद्रोरवीति । (so!) यदेष सर्वाणि भूतान्यनुप्रविष्टस्त-
न्मर्त्यान् । आविवेशेति तस्मादोमित्येकाक्षरमुद्गीथमुपासीतेत्याह । भग-
वान् शौनकः शौनक इति ॥ इति शौनकोपनिषत्समाप्ता ॥

श्यामोपनिषद्

This little work begins like Kālikopaniṣad and is not much different from the first third of it.

1 copy : in Devanāgarī (68). Faulty.

Ends :

सर्वाः सुप्ताः भूताः असिताङ्गी जागर्त्ति । इमामसिताङ्गी उपनिषदं
यो ऽधीते अपुत्री पुत्री भवति यो ऽन्यस्य वरदो दृष्ट्वा जगन्मोहयेत्
गङ्गादितीर्थक्षेत्राणामग्निष्टोमादियज्ञानां फलभागीयते ओं इत्यथर्ववेदे सौ-
भाग्यकाण्डे श्यामोपनिषत् ॥

श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषद्

A fabrication as stupid as its title is presumptuous. Everything is born from the Puruṣottama who is Kṛṣṇa.

* Ṛgveda III, 47, 5.

1 copy: in Devanāgarī (65). Most corrupt.
Begins:

श्रीवेद्व्यासाय नमः ॥ ओं निरञ्जनो निर्विकल्पो नमो नमः । पूर्णानन्दो हरिस्तस्मात् माषा(!)रहितः पुरुषोत्तमः । अष्टावष्टसहस्रे द्वे स्त्रियो जायन्ते पुरुषोत्तमात् । स्मृतिर्जायते पुरुषोत्तमात् । षट् शास्त्राणि जायन्ते पुरुषोत्तमात् ।

Ends:

श्रीकृष्णभगवान् नारायण परमात्मा पुरुषोत्तमः त्रिगुणरहितः स्वयं । कथं । पुरुष एवेदं सर्वम् ॥ श्रीकृष्णपुरुषोत्तमसिद्धान्तउपनिषत्समाप्तः॥

श्रीजाबालदर्शनोपनिषद्

See दर्शनोपनिषद्.

श्रीबालात्रिपुरसुन्दर्युपनिषद्

Thus the last Anuvāka of Mahānārāyaṇopaniṣad (I) is called in one MS. (111). The title is probably a mistake, the contents *(agnihotra* of the *jīvanmukta)* having nothing to do with it.

श्रीविद्यातारकोपनिषद्

In this Upaniṣad, which consists of four Khaṇḍas, Hayagrīva teaches Agastya that Śrīvidyā (see next No.) is the saviour (tāraka), and he further explains how the latter is connected with (1) the Praṇava, (2) the state of dream, (3) the state of dreamless sleep, and, finally, (4) the Turīya.

1 copy : in Grantha (29).

Begins :

ओं । अथ श्रीविद्यातारकोपनिषत् । अथैनमगस्त्यः पप्रच्छ हयग्रीवः (so) । किं तारकं किं तरति । स होवाच हयग्रीवः । तारं दीर्घानुलम्बिपूर्वकं प्रथमं खण्डम् ।

Ends :

ओमित्यात्मानमादाय मनसा चतुष्कूटाकार्य (?) तदा चतुष्कूटाहमिति तपरा (!) प्रवदन्ति ये न ते सांसारिणोन्मनाविराभा (so) एव न संशय इत्युपनिषत् । य एवं वेद स मुक्तो भवति स मुक्तो भवति । इत्यगस्त्यः ॥ इति श्रीविद्यातारकोपनिषत्समाप्ता ॥

श्रीविद्याम्नायोपनिषद्

A Tāntric work of some importance. It is divided into Pūrva- and Uttara-tāpinī consisting of three Khaṇḍas each, and chiefly deals with the following topics explained to Sāmaśravas by Yājñavalkya: Praṇava, Maṇidvīpa, Śrīcakra (1); Creation (2); Śrīcakra-yantra (3); Śrīvidyā and Brahmavidyā (1); Mantras (2); order of Dhyāna; Mantras and Devatās (3). The Adhiṣṭhāna-devatās of the four Vedas are identified with the Āmnāya-śaktis which are (in) the four doors of the diamond palace of Maṇidvīpa. On Śrīvidyā compare Śabdakalpadruma, *sub voce*.

1 copy : in Grantha (29). Very incorrect. For extracts see No. 524 (Tripurātāpinyupanisad) of the Government Oriental MSS. Library, Madras. The Uttara-tāpinī begins :

अथ भगवन्कथन्नु (so) परमहंसं मे ब्रूहीति । का ब्रह्मविद्या । मनूनां सर्वेषां भूतानां प्रथमा श्रीविद्या । etc. Colophon: इति तृतीयः खण्डः । इत्युत्तरतापिनी । श्रीविद्याम्नायोपनिषत्समाप्ता ॥

श्वेतमृत्तिकोपनिषद्

Another Ūrdhvapuṇḍra-vidhi. Compare Varāhopaniṣad (II).

1 copy: in Grantha (28).

Begins:

श्वेतमृत्तिकोपनिषत् । संप्रणिपत्य (so) नारदो ब्रह्माणमन्वयुङ्क्त । अधीहि भगवन् मे किं पवित्राणां पवित्रं केन वा कर्माणि सफलानि ।

Ends:

मध्ये छिद्रं हरिद्राङ्कितं । अमृतमेव श्वेतमृत्स्ना भविष्यति तयैव धारयेत् । य एवं वेद । इत्युपनिषत् ॥ हरिः ओं श्वेतमृत्तिकोपनिषत्समाप्ता ॥ कृष्णार्पणमस्तु । श्रीनिवासस्वामिने नमः ॥ इत्यथर्वणशिरसि प्रोक्त श्रीभाष्योपयुक्तदशोपनिषदि श्वेतमृत्तिकोपनिषत् ॥

श्वेताश्वतरोपनिषद्

19 copies: in Grantha (9, 13, 15, 25, 34), Telugu (37, 48), Śāradā (61), and Devanāgarī (71, 79, 79, 95, 96, 97, 97, 97 103, 113, 117).

Bhāṣya by Raṅgarāmānujamuni.

1 copy: in Devanāgarī (115). Incorrect.

Begins :

श्रीमते रामानुजाय नमः ॥

अतसीगुच्छसच्छायमाश्रितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान्गुरूनपि ।
श्वेताश्वतरमन्त्राणां विवृतिं करवाण्यहम् ॥

स्वेतरसमस्तचेतनविलक्षणपरमात्मरूपनिर्दिधारयिषयेयमुपनिषदारभ्यते विद्यास्तुत्यर्थामाख्यायिकामाह **ब्रह्मवादिनो वदन्ती**ति ब्रह्मवदनशीला मुनयो वक्ष्यमाणप्रकारेण वदन्ति ।

Ends :

यदा चर्मवदिति वाक्यमुपायान्तरभावपरं नान्यः पन्था इत्युक्तार्थविवरणरूपम् एवमुपक्रमोपसंहारादिभिर्भगवत्परत्वावगमात् बहूपनिषच्छ्रुतयोत्य(?)र्थासाधारणाभ्यस्तनारायणशब्दानुरोधेनैव नानार्थसाधारणैकैकोपनिषत्पठिता योग्यार्थशिवादीनां नेयत्वाच्चास्या उपनिषदो भगवत्परत्वं सिद्धमिति श्रीरङ्गरामानुजमुनिकृतिषु श्वेताश्वतरोपनिषत्प्रकाशिका समाप्ता ॥

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī, (117).

Begins :

यत्र कारणसद्ब्रह्मसम्यग्दर्शनमुच्यते ।
श्वेताश्वतरसंज्ञायाः श्रुतेर्भाष्यं विरच्यते ॥

ब्रह्मवादिन इति । निर्गुणब्रह्मवदनशीलाः परमर्षयो वदन्ति । अन्योन्यभाषणात्मकं मननरूपं वादं कुर्वन्तीत्यर्थः । कथमिति । तदाह । **किं कारणं ब्रह्म** अस्मदाचार्यमुखाच्छ्रुतपूर्वं ब्रह्म जीवानामुत्पत्तिं प्रति किं निमित्तकारणं स्यादुतोपादानकारणं स्यात् ॥

Ends:

यदुक्तं पापेषु प्रक्षीणेष्वित्यादि तत्प्रत्युच्यते । न हि कस्यचिदपि पापक्षये सति ब्रह्मात्मैक्यापरोक्षज्ञानं भवितुमर्हति परोक्षज्ञानमात्रोदयाभ्युपगमात् । तदपि सामान्यमेव तत्त्वमसीत्युपदेशपूर्वकपरोक्षज्ञानस्यैव विशेषत्वात् । आचार्यवान् पुरुषो वेदेति श्रुत्यन्तरं च भवति । तस्मादलमतिप्रसङ्गेन ॥ इति श्रीमत्सुन्दरेश्वर........समाप्तम् ॥

षोढोपनिषद्

So called because of the six-fold *nyāsa* of the Kālī-mantra recommended here.

1 copy: in Devanāgarī (89).

Begins:

अथाह वै श्म शवः शयनं शानं श्मशानं तदधिष्ठानो महाकालस्तत्पर्यंकसमासीनां विश्वव्यापकरूपिणीं कालीं कालादिसंत्रासान् (!) कालीं चतुर्युगाधिष्ठात्री (!) स्वस्मिन्भाव्य (!) षोढां न्यसेत् ।

Ends:

तत्स्पर्शादष्टलोहस्पर्शो भवेत् शक्तिकुंडे जिह्वां नाडीं वान्यस्य योजयेत् कालीरूपो भवेदिति शिवोमित्यथर्वणीये सौभाग्यकांडे षोढोपनिषत्सप्तमी ॥

संहितोपनिषद्*

i.e., the secret instruction concerning the esoteric meaning of the letters (sounds), and, particularly, the ways of combining them (**संहिता, सन्धि**). There is a Saṃ-

* This title seems to have been a riddle to most authors of catalogues.

hitopaniṣad in every Veda, but, excepting that of the Taittirīya (though it is of the same nature as the others) they are as a rule, in spite of their name, assigned to the Āraṇyaka and Brāhmaṇa rather than to the Upaniṣad literature. They are the following:

1. Aitareyāraṇyaka III, [1 and] 2.
2. Saṃhitopaniṣad [-brāhmaṇa].
3. Taittirīyopaniṣad I [2 and] 3.

For a MS. of No. 1, in the Śāṅkhāyana recension, see above, p. 81.

सदानन्दोपनिषद्

On the inner and outer bearing of the Liṅga as the way to liberation.

1 copy: in Telugu (38).

Begins:

हरिः ओं । अथैनं सदानन्दः संवर्तो जैगिषव्यश्च नीललोहितं रुद्रमुवाच(!) । भगवन् किमपवर्गं साधयतीति ।

Ends:

यो विद्वान्ब्रह्मचारी गृही वानप्रस्थो यतिर्वा सदानन्दोपनिषदं पठति सो ऽग्निपूतो भवति ......स सकलभोगभुग्देहं त्यक्त्वा शिवसायुज्यमेति ॥ इत्युपनिषत् ॥ हरिः ओं ॥ सदानन्दोपनिषत्समाप्ता ॥

सर्वसारोपनिषद्

Called also **सर्वोपनिषत्सार, सर्वसार,** and **सर्वोपनिषद्.**

A. Shorter Recension.

10 copies: in Grantha (7), Telugu (49), Śāradā (59), and Devanāgarī (76, 80, 87, 91, 103, 109, 114). No. 5 ends: इति श्रीशङ्कराचार्यविरचितसर्वोपनिषत्सारं समाप्तम्॥

(Dīpikā by Nārāyaṇa, see Poona ed.).

B. Longer Recension.

It adds to A a prose sentence and six verses of the nature of Svarūpopanisad. This recension seems not to be found in the North.

3 copies : in Grantha (14), Telugu (38), and Devanāgarī (117).

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (117).

Begins :

नत्वा श्रीसद्गुरुं शान्ति पठित्वा सहनाविति ।
सर्वसारोपनिषदं व्याख्यास्ये सङ्ग्रहादहम् ॥

इह खल्वष्टोत्तरशतसंज्ञासु षट्सप्ततिसङ्ख्यासूपनिषत्सु प्राथमिकां सर्वसारोपनिषदं व्याख्यातुं प्रयत्यते । कथमिति ॥

Ends :

मोक्षस्य सप्रतियोगिकब्रह्मात्मकस्याकर्त्रात्मत्वेऽपि कर्त्रात्मविषयकबन्धनिवृत्तिसमकालं कतकरेणोरिव निवृत्तिसंभवान्मोक्षातीतावस्थागतनिष्प्रतियोगिकारूपब्रह्मपर्यवसन्ना एव वेदान्ताः । अपि तु मुमुक्षुभिः सप्रतियोगिकमेव वेद्यमिति ॥ इत्यप्पयदीक्षिताचार्य........समाप्तम् ॥

सर्वोपनिषत्सार (II)

See स्वरूपोपनिषद् .

संन्यासोपनिषद् (I)

This is the northern recension of Kuṇḍikopaniṣad which, however, does not contain the first chapter of the present text.

4 copies: in Śāradā (59) and Devanāgarī (103, 109, 114).

(Dīpikā by Nārāyaṇa, see Poona ed.).

संन्यासोपनिषद् (II)

The first Adhyāya corresponds to the first two sections of Kaṇṭhaśrutyupaniṣad. The second Adhyāya consists of about 160 Granthas, and is mainly in verses.

2 copies: in Devanāgarī (114, 119), the latter with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

सन्यासधर्माः प्रोच्यन्ते विस्तरेणैव यत्र सा ।
इयं व्याख्यास्यते साक्षात्सन्यासोपनिषत्सती ॥

अत्रादौ मात्रादीन्बन्धूननुमोदयित्वेत्युच्यते नैतद्युक्तम् ।

End:

पश्चात्तु ज्ञानाभ्यासवतो मोक्तुर्जीवन्मुक्तस्येत्यर्थः वानरीप्रवृत्तिः भाक्तमेव न मुख्या मार्जारस्य कुड्योपरिस्थितिरिव वैराग्यानुष्ठानस्य दुर्बलत्वसंभवात् कृतकृत्यत्वात्तस्य तदनवद्यम् ॥ इति सुन्दरेश्वर.... समाप्तम्॥

सरस्वतीरहस्योपनिषद्

2 copies: in Devanāgarī (105, 118), the latter with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

यामाचार्यमुखादधीत्य पुरुषः सद्योविमुक्तो भवे-
द्यस्यां सर्वरहस्यमस्ति सकलाम्नायान्तसिद्धं महत् ।
यस्यां षट् च समाधयो निगदितास्तत्त्वानि मन्त्रापरे
व्याख्यास्ये कुतुकेन तामिह सरस्वत्या रहस्यश्रुतिम् ॥

शब्दब्रह्ममयी वाणी परब्रह्मस्वरूपिणी ।
सर्वलोकोपकाराय सरला मद्विजृंभताम् ॥

ऋषयइति अरण्यवासिनो ब्रह्मर्षयः कदाचिदाश्वलायनं संपूज्य पृष्टवन्तः ॥

End:

अस्यां सरस्वतीरहस्योपनिषदि परमरहस्यार्थानामभिहितत्वाद्बुद्धिमानवैव पुनःपुनः परिचयं कुर्यादिति ॥ इति सुन्दरेश्वर........समाप्तम् ॥

सावित्र्युपनिषद्

2 copies: in Devanāgarī (89, 119). No. 1 agrees with the printed text (Bombay edition of the 108 Upaniṣads) up to line 22nd only whence it proceeds: आदित्यो वै गर्भ (so) प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते, etc. (13 lines of the MS.), the end being: यस्मिन्देवा अधि विश्वे निषेदुः यस्तं निवेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इत्युपनिषत् ॥ ओं वाङ् मे मनसीति शान्तिः ॥

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (119).

Begins :

बहूनां मिथुनानां च बलातिबलयोरपि ।
स्वरूपं प्रोच्यते यस्यां सावित्रीयं प्रपञ्चयते ॥

ननु **यत्र वायुस्तत्राकाश** इत्युपपन्नं न तु **यत्राकाशस्तत्र वायु-रिति** कुतः

Ends :

तस्माद्रोगमोक्षोभयार्थकौ बलातिबलौ मन्तव्यौ ॥ इति सुन्दरेश्वर ....समाप्तम् ॥

सिद्धान्तशिखोपनिषद्

This seems to be a kind of *Pūrva-tāpinī* to Siddhāntasāropaniṣad. Like Rudropaniṣad, it enjoins the necessity of *Śiva-bhakti* the appearing of which, however, is said to be dependent on the bearing of ashes and Rudrākṣas for which reason the prescripts for the latter are given. The work is mainly in Ślokas. The name at the beginning is hardly appropriate.

1 copy : in Devanāgarī (111).

Begins :

श्रीगणेशाय नमः ॥ अथ स्वरूपसिद्धान्तोपनिषत्प्रारम्भः । ओं अथ भारद्वाजः कुमारं पप्रच्छ किमेव (so) भवादृशानां परमशिवभक्तानां सिद्धान्तः ।

Ends:

इत्याह भगवान् स्कन्दः ॥ तामेनां सिद्धान्तशिखां यो ऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति........इति वेदवचनं भवति वेदवचनं भवति ओं सत्यमित्युपनिषत् ॥ इति सिद्धान्तशिखोपनिषत्समाप्तम् ॥

सिद्धान्तसारोपनिषद्

A detailed and pictorial paraphrase, from the standpoint of mystical Advaita, of the Paurāṇic account of the temple of Śiva with its five walls on the top of the Kailāsa mountain.

1 copy, in Devanāgarī (111).

Begins:

श्रीगणेशाय नमः । अथ सिद्धान्तसारोपनिषत्प्रारम्भः । ओं भद्रं कर्णेभिरिति शान्तिः । अथ भारद्वाजः कुमारं पप्रच्छ । भगवन्मे ब्रूहि परमतत्त्वकैलासरहस्यं । तं होवाच स्कन्दः । साधु पृष्टं सर्वं निवेदयामि यथा ज्ञातं मया । हे भारद्वाज शृणु वाक्यमेतत् । परमकैवल्यः स एव कैलासः ।

Ends:

इति पञ्चमावरणं ५ ॥ परमचिद्विलाससमष्ट्याकारं । निर्मलं निरवद्यं । निराश्रयं । अतिनिर्मलानन्तकोटिरविप्रकाशैकोज्ज्वलं । अनन्तोपनिषदर्थस्वरूपं । अखिलप्रमाणातीतं । मनोवाचामगोचरं । नित्यमुक्तस्वरूपं । कैवल्यानन्दस्वरूपं । परमानन्दलक्षणापरिच्छिन्नानन्तपरं ज्योतिः शाश्वतं शश्वद्विभाति । तदभ्यन्तरसंस्थाने अमितानन्दचिद्रूपाचलं । अखण्डपरमानन्दविशेषं । बोधानन्दमहोज्ज्वलं ।........वेदान्तसारभूत-

सिद्धान्तानन्तस्कन्धैर्विराजितं ।........अत्यन्तोन्नतानन्तशिखराकारं शि-
वालयं । ... ..आलयमध्यगतं स्वात्मज्योतिर्मयचिद्रूपवेदिकास्थानविशेषं
तदुपरि चैतन्यशक्त्यालङ्कृतस्वात्मचैतन्यकैलासेश्वरलिङ्गाकारं सुपूजितं ।
.... . .अखण्डतेजोमण्डलविशेषं दिव्यनानामङ्गलवाद्यैरलङ्कृतं । प्रणवा-
त्मकध्वन्याकारं । विज्ञानघनस्वरूपं । अनन्तचिदादित्यसमष्ट्याकारं ।*
इति सिद्धान्तसारोपनिषत्समाप्तम् ॥

सीतोपनिषद्

1 copy: in Devanāgarī (118), with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

सीताया उच्यते रूपद्वयं सगुणनिर्गुणं ।
यत्र व्याख्यास्यते सेयं सीतोपनिषदुत्तमा ॥

कथमिहोभयात्मकत्वं सीताया अवगम्यत इति चेदुच्यते । प्रणवप्रकृतिरूपत्वादिति, etc.

End:

तथापि वैखानसाख्यस्य पर्वतस्य सर्ववेदमयत्वाद्यवधारणादोङ्कारात्परतो ऽभिधीयमानत्वाच्च स तन्निर्विशेषं ब्रह्मेत्यवगन्तव्यम् ॥ इति श्रीमत्सुन्दरेश्वर. ......समाप्तम् ॥

सुन्दरीतापिन्युपनिषद्

See त्रिपुरातापिन्युपनिषद्.

* Something seems to have been omitted here.

सुबालोपनिषद्

6 copies : in Grantha (14, 31), Telugu (38), and Devanāgarī (79, 96, 117).

Vivarana by Sudarśanācārya, to Kh. I–V.

See Government Oriental MSS. Library, Madras, No. 830.

1 copy: in Grantha (31). End of colophon:

सुबालोपनिषद्विवरणे पञ्चमः खण्डः ॥

सुबालोपनिषट्टीकाकारकाय नमो नमः ।
ज्ञानादिगुणपूर्णाय श्रीसुदर्शनसूरये ॥

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins :

यत्र नारायणात्मत्वं सर्वस्य प्रोच्यते स्फुटं ।
तां सुबालोपनिषदं व्याख्यास्ये सङ्ग्रहेण वै ॥

तद्ब्रह्म ब्रह्मवादिन आहुः । किंतदासीदिति प्रश्नं पूर्वोपनिषच्छ्रोता मैत्रेय एवाकार्षीदित्यवगन्तव्यम् ॥

Ends:

तस्मात्तेषां कुलान्यवश्यज्ञातव्यानीति सर्वमनवद्यम् ॥ इति सुन्दरेश्वर ....समाप्तम् ॥

सुमुखीउपनिषद्

A Dhyāna on Mahādevī as the beautiful (सुमुखी) sixteen years old Cāṇḍālinī, which is followed by the *mantroddhāra* and *pūjā* with fish and flesh.

1 copy: in Devanāgarī (72).

Begins:

श्रीगणेशाय नमः ॥ अथैनामावाहयाम्यनद्यां (so) शवाधिरूढां रक्त-वस्त्रालंकारयुक्तां रक्तपीठोपविष्टां गुञ्जाहारविभूषितहृदयां षोडशसमास-माकारां युवतीं, etc.

Ends:

कुलाकुलामृतैर्वेदीं संतर्प्य स्वहृदये तां परां विसृज्य सुखेनैव शिव-शक्त्यात्मको भावयन् विहरेत् । स सिद्धीश्वरः स सर्वेश्वरः स लोका-ध्यक्षो भवेद्ध्रुवो भूत्वा विभावतीति ॥ इति सौभाग्यकांडे सुमुखीउप-निषत् ॥

सुवर्णघर्मोपनिषद्

This is the eleventh Anuvāka of the third Prapāṭhaka of the Taittirīyāraṇyaka.

1 copy: in Devanāgarī (93).

सूर्योपनिषद्

Called also, though not in the South, **सूर्याथर्वशिरस्**, **सूर्याथर्वाङ्गिरस्**, and **आदित्योपनिषद्**, and forming part of the Ātharvaśirsa-pañcaka (see Preface).

6 copies: in Devanāgarī (82, 86, 94, 94, 106, 119).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (119).

Begins:

यत्रादित्यस्य सार्वात्म्यमुच्यते तद्विशृङ्खलं ।
सूर्योपनिषदं मुख्यां व्याख्यास्ये स(so) द्विजन्मनां ॥

कथं द्विजन्मनां मुख्येत्युक्तमिति चेद्ब्राह्मणैर्नित्याराध्यमानाया गायत्र्या इहाभिधीयमानत्वात् ।

Ends:

इत्येवं सूर्योपासनस्य त्रैविध्यं मुमुक्षुनिष्कामसकामोपासकविषयकमवगन्तव्यम् ॥ इति सुन्दरेश्वर........समाप्तम् ॥

सौभाग्यलक्ष्म्युपनिषद्

1 copy: in Devanāgarī (118), with the *Bhāṣya of Appayadīkṣita.*

Beginning of the Bhāṣya:

देवेभ्यो भगवान्विष्णुः श्रीविद्यां योगमुत्तमं ।
नवचक्रविवेकं च यत्र प्रोवाच सादरम् ॥
सौभाग्यलक्ष्मीनाम्ना तामेनां स्वारस्यगर्भितां ।
श्रुतिं निष्कामसुलभां व्याख्यास्ये सर्वकामदां ॥

सावधानमना इत्यकारान्तः शब्दः **सर्वोत्कटां** सर्वोत्कृष्टां **सर्वमन्त्रा** एवासनानि तेषु **गताम**वस्थितामित्यर्थः

End:

य एवंविधां सौभाग्यलक्ष्म्युपनिषदं नित्यमधीते सो ऽग्निपूतो भवतीत्यादि स्पष्टार्थम् ॥ इति सुन्दरेश्वर .. ....समाप्तम् ।

स्कन्दोपनिषद्

5 copies: in Grantha (7) and Devanāgarī (75, 89, 106, 119). In Nos. 1 and 4 the Upaniṣad ends with the ninth Śloka to which the words are added: **(श्री,** 4) **तथा मे स्वस्तिरायुष्यां (स्वस्तिरायों,** 1) **नमः ।**

Bhāṣya by Appayadīkṣita.

1 copy : in Devanāgarī (119).

Begins :

अद्वैतं द्विविधं यस्यामत्यावश्यकमुच्यते ।
स्कन्दोपनिषदं मुख्यां व्याख्यास्ये सकुतूहलम् ॥

अत्राच्युतोऽस्मीत्यादि वक्ता महादेवेति संबोधनात् स्कन्द एव स्वपितरं स्वानुभूतिनिश्चयमाहेत्यवगन्तव्यम् ॥

Ends :

निर्गुणशिवविष्णोः अभेदोऽपि सगुणविष्णोर्निर्गुणशिवस्य च भेदात्तद्विष्णोः परमं पदमिति युक्तम् ॥ इति सुन्दरेश्वर.........समाप्तम् ॥

स्वरूपसिद्धान्तोपनिषद्

See सिद्धान्तशिखोपनिषद्.

स्वरूपोपनिषद्

Twenty-five to twenty-eight Ślokas on the idea "I am Brahman." Called also ब्रह्मानुचिन्तनिका and सर्वोपनिषत्सार and ascribed, in some MSS., to Śaṅkarācārya.

6 copies :* in Devanāgarī (66, 67, 75, 89, 101, 111).

Beginning :

(ओं) श्रीगणेशाय नमः (श्रीशिवाय नमः, श्रीगुरुभ्यो नमः, अथ स्वरूपोपनिषल्लिख्यते) ॥

---

* It is strange that Aufrecht's Catalogus mentions but one copy of this Upaniṣad.

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥

End:

अत्र प्रमाणं वेदान्ता गुरवो ऽनुभवस्तथा (वेदान्तात्, 2; °नुभवो गुरवस्तथा, 1, 6) ।
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ।
नाहं देहो (देही, 1) न मे देहः केवलो ऽहं सनातनः ।

तथा च श्रुत्यन्तरे ऽपि (तथा श्रुत्यन्तरे चापि, 6; missing in 2 and 3) एकमेवाद्वितीयं ब्रह्म (°तीयं तं, 2) नेह नानास्ति किञ्चन (किञ्चनेति श्रुतेः, 6) इत्यथर्ववेदे स्वरूपोपनिषत्संपूर्णा (so 1; इति श्रीसर्वोपनिषत्सारं संपूर्णम्, 3; इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिता स्वरूपोपनिषत्समाप्ता, 6; इति श्रीमच्छङ्कराचार्यविरचिता ब्रह्मानुचिन्तनिका संपूर्णा, 2) ॥

स्वसंवेद्योपनिषद्

This Upaniṣad, inspired, as it seems, by the Mahāyānist doctrine of vacuity (śūnya-vāda), proclaims a most radical agnosticism by asserting in four chapters: (1) that there is no reincarnation (existence being bubble-like), no knowledge, no god (īśvara), no world; that all traditional literature, Śruti and Smṛti, is the work of conceited fools; (2) that Time the Destroyer and Nature the Originator are the rulers of all existence, but not good and bad deeds*, and that

---

* कालकर्मोत्मि(!)कमिदं स्वभावात्मकं चेति । न सुकृतं न दुष्कृतं ।

there is neither hell nor heaven (nirvāṇa)*; (3) that, 'deluded by flowery speech'†, people cling to gods, teachers, sacred places, though there is, in reality, no difference at all between high, middle, and low, Viṣṇu and a dog; (4) that, though all words are untrue and all ideas mere illusions, yet liberation (jīvan-mukti) is possible by a thorough realization of *Bhāvādvaita.*

2 copies: in Devanāgarī (64, 116), with exactly the same numerous errors.

Beginning:

श्रीगणेशाय नमः । अथ स्वसंवेद्योपनिषद्दलिख्यते (so) । ओं शान्तिः शान्तिः शान्तिः । हरिः ओं । सर्वेषां प्राणिबुद्बुदानां निरञ्ज-नाव्यक्तामृतनिधौ विलयविलासस्थितिर्विजृम्भते । तेषामेव पुनर्भवनं नो इहास्ति ।

End:

कर्माद्वैतं न कार्यं भावाद्वैतं तु कार्यं‡। निश्चयेन सर्वाद्वैतं कर्तव्यं गुरौ द्वैतमवश्यं कार्यं यतो न तस्मादन्यत् येन सर्वमिदं प्रकाशितं कोऽन्यतस्मात्परः (so) स जीवनमुक्तो भवति स जीवन्मुक्तो भवति य एवं वेद य एवं वेद ॥ ४ ॥ इति स्वसंवेद्योपनिषत्संपूर्णा ॥

हनुमदु[क्तरामो]पनिषद्

See रामरहस्योपनिषद्.

* The 'land of the Buddhas' is, of course, nothing but a *svarga* from the standpoint of Advaita.

† पुष्पितवचनेन मोहिताः, comp. Bhagavadgītā II, 42.

‡ Judging from what precedes, this means that one must not try to make the principle of Advaita a principle of acting, but confine it to the mind.

हंसषोढोपनिषद्

Another Kālī Upaniṣad. The sixfold *nyāsa* is here connected with the word *haṃsa*.

1 copy: in Devanāgarī (89). Faulty.

Beginning:

अथाह वै हंसषोढान्यासी शिवो भवेत्सर्वसिद्धीश्वरो भवेत् एतत्फलं न वक्तुं सदाशिवो ऽपि समर्थः षोढान्यासस्य विरूपाक्षमहाकाल ऋषिः अनुष्टुप् छंदः ।

End:

अना(!)धीत गतिविद्यां लभेत् कर्तव्याकरणादिकर्ता भवेत् सर्वसिद्धीश्वरो भवेत् कालीरूपो भवेत् सो ऽहं हंसः इत्याह भगवान् सदाशिवेति (!) प्रोतं (!) वेद ओं मित्यथर्वणीये सौभाग्यकांडे हंसषोढोपनिषं(!) नवमः ॥

हंसोपनिषद्

It is difficult to keep the MSS. asunder, but the following classification will do for the present:

A. Northern Recension.

10 copies: in Grantha (13), Telugu (37), Śāradā (59), and Devanāgarī (81, 83, 87, 103, 109, 114, 117).

(Dīpikā by Nārāyaṇa, see Poona ed.).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (117).

Begins:

सनत्कुमारसंप्रोक्तां गौतमाय महर्षये ।
हंसोपनिषदं सम्यग्व्याख्यास्ये मुक्तिदायिनीम् ॥

भगवन्निति तमुपायं ब्रूहीति शेषः ॥

Ends:

तदा **सदाशिवः प्रकाशयति** । स्वयं प्रकाशते । साधकस्यात्मानं स्वाभिन्नत्वेनावभासयतीति वा कथंभूतः सदाशिव इत्यत आह । **ओङ्कारशक्त्यात्मे**त्यादि स्पष्टार्थः ॥

इति सुन्दरेश्वर.........समाप्तम् ॥

B. Southern Recension.

6 copies: in Grantha (4), Telugu (39, 49), Kanarese (54), and Devanāgarī (72, 89).

(Dīpikā by Śaṅkarānanda, see Poona ed.).

हयग्रीवोपनिषद्

3 copies: in Grantha (27), and Devanāgarī (75, 118).

Bhāṣya by Appayadīkṣita.

1 copy: in Devanāgarī (118).

Begins:

हयग्रीवस्य मन्त्रास्ते यत्र वाक्यचतुष्टयं ।
हयग्रीवोपनिषदं व्याख्यास्ये भोगमोक्षदाम् ॥

ओं नारद इति कदाचिन्नारदाख्यो महर्षिः **ब्रह्माणं** विधि**मुपसमे**त्योवाच ।

Ends:

अथ हयग्रीवमन्त्रजपानन्तरं अनुमन्त्रान्वक्ष्यमाणाञ्जपति ॥ इति सुन्दरेश्वर........समाप्तम् ॥

हेरम्बोपनिषद्

This Upaniṣad seems to be only met with in the company of Gaṇeśatāpinī. After having given the etymology of Heramba (a synonym of Gaṇeśa), Parameśvara teaches Pārvatī the Heramba-tattva according to which Gaṇeśa is the god of gods. Indravajrā (Upajāti) verses.

3 copies: in Devanāgarī (74, 85, 101).

Beginning:

ओं । (श्रीगणेशाय नमः । श्रीहेरम्बाय नमः । श्रीवक्रतुण्डाय नमः।) अथातो हेरम्बोपनिषदं व्याख्यास्यामो (so, all) गौरी सा सर्वमङ्गला सर्वज्ञं परिसमेत्योवाच । अधीहि भगवन्नात्मविद्यां प्रशस्तां यया जन्तुर्मुच्यते मायया च ।

End:

इमां विद्यां प्राप्य गौरी महेशादभीष्टसिद्धिं समवाप सद्यः ।
पूजापरा सा च जजाप मन्त्रं शम्भुं पतिं प्राप्य मुदं ह्यवाप ॥

य इमां हेरम्बोपनिषदमधीते स सर्वान्कामान्लभते........स सर्ववेदपारायणं लभते गणेशसायुज्यमाप्नोति य एवं वेदेत्युपनिषत् ॥ सह नाववतु, etc, ॥ इति हेरम्बोपनिषत्समाप्ता ॥

APPENDIX.

बाष्कलमन्त्रोपनिषद्वृत्तिः ।

॥ श्रीकृष्णाय नमः ॥

मेधातिथिं काण्वमिन्द्रो जहारेत्याद्या बाष्कलानां मन्त्रोपनिषत् । तस्याश्चेयमल्पाक्षरा वृत्तिरारभ्यते । मेधातिथिनामानमृषिं कण्वस्य पुत्रं सामवेदब्राह्मणप्रसिद्धमिन्द्रः जहार ॥ **द्या मेषभूयोपगतो विद्रानः** ॥ मेषभूयं मेषभावं । भुवः क्यप् । उपगतः प्राप्तः । सामवेदब्राह्मणप्रसिद्धाख्यायिकः (४०) । द्याः स्वर्गलोकान् प्रतीति विवक्षितं जहार हृतवान् । विद्रानः ज्ञानी ॥ **तमन्य इत्तमनं परिप्राट्** ॥ तं इन्द्रं अन्यः मेधातिथिः इदिति निरर्थको निपातः । तमनं । हरणेन ग्लानिपदं । परिपृच्छतीति परिप्राट् । मेधातिथिः ॥ **पद एनं नियुजे परस्मिन्** ॥ १ ॥ परे स्मिन् (४०) पदे ज्ञेये । तत्स्वरूपे पदार्थे नियुजे नियुक्तवान् । विलक्षणमेषीभूतेन्द्रकर्तृकविलक्षणक्रियादर्शनात् आपाततो विलक्षणः परो देवः कश्चिन्नतु मेष इति तात्त्विकतत्स्वरूपज्ञानाय वक्ष्यमाणप्रश्नेन परं पदं ज्ञेयं स्वस्वरूपं कथयेति प्रश्नेन नियोजितवानित्यर्थः । प्रश्नमेवाह श्रुतिः ॥

को ह स्मैष भवसि व्यवायः ॥ ह इति पूर्ववृत्तावद्योतको निपातः । स्मेति निरर्थकं । एष प्रत्यक्षः । व्यवायो ज्ञेयः । व्यवपूर्वस्यैतेर्घञि रूपं । कश्चित् ज्ञातुं योग्यस्त्वमसि ॥ **नावायो म इह शश्वदस्ति** । मे मम शश्वदिति ध्रुवार्थे आवायो ज्ञानं नास्ति कस्त्वमिति ।

दृश्यमाने मेषस्वरूपे कथमेवं संशय इति चेत् । तत्राह ॥ **सुशेवमिच्चंक्रमसि** ॥ शोभनमेव चंक्रमणं करोषि ॥ **प्रपश्यन् इत्था न कश्चोरणमाचचक्षे** ॥ २ ॥ इत्था न । इत्थमिव । नकार इवार्थः । को वा इत्थं क्रममाणं प्रपश्यन् उरणं मेषं आचचक्षे । उक्तवान् । दृष्टवान् वा । इत्थं क्रममाण उरणो न केनचिद्दृष्ट इति भावः । क्रमेण वैलक्षण्यमेवाह ॥ **नेमामस्पृक्षदिदुदस्यमानः** ॥ इमां पृथिवीं उदस्यमान इदेवार्थे कूर्दन्नेव न अस्पृक्षत् न स्पृशतीति लकारव्यत्ययः । नैतावता वैलक्षण्यमत आह ॥ **को अद्धामूमभिचङ्क्रमीति** ॥ अद्धा साक्षात् । अनेनैव शरीरेण । अमूं द्यां कः अभिचङ्क्रमीति अभिक्रामति । प्रश्नमुपसंहरति ॥ **तदिच्छाधि यो असि सर्वविंत्तमः** ॥ तत् तस्मात् शाधि । इदित्यनर्थकं । शिक्षय यस्त्वं सर्ववित्तमः सर्वज्ञतमः असि तत्स्वरूपं कथयेति भावः । अकथने ऽनिष्टं संभाव्यते । तन्मा भवत्वित्याह । **न त्वाश्नवद्ब्रह्म रिषा मयास्वि** ॥ ३ ॥ मयस्वि तेजस्वि ब्रह्म ब्राह्मण्यं रिषा क्रोधेन त्वा त्वां न अश्नवत् न अश्नोति न व्याप्नोत् । अस्मदीयक्रोधव्यापारविषयो माभूदित्याभिप्रायः । कुतस्तवैवं बलमत आह ॥ **इन्द्रो नृचक्षा वृषभस्तुराषाट्** ॥ इन्द्रः परमेश्वरः नृचक्षा सर्वजगत्कर्मसाक्षी वृषभः कामप्रदस्तुराषाट् तुरः परबलं सहते अभिभवतीति सहेः छन्दसीति ण्विः ॥ **प्रसासहिस्तपसा मा विचक्षे** ॥ प्रसासहिः प्रसहनशीलः तपसा उपलक्षणे तृतीया मा मां विचक्षे पश्यति । अतः सत्यमकथयत ईश्वराद्भयमप्याह ॥ **स इदेवो ऋतमन्वयन्तं** ॥ इदेवार्थे स इत् स एव देवः ऋतं सत्यं अनु लक्षीकृत्य अयन्तं अगच्छन्तं सत्येन पथा अगच्छन्तं सत्यमब्रुवाणमिति यावत् ॥ **प्रभीमकर्मा तवसो ऽपविद्धात्** ॥ ४ ॥ अपविद्धात् क्षिप्तात्तवसो वज्रात् प्रभीं प्रकृष्टं भयं मा अकः कार्षीत् । प्रष्टव्यमाह ॥ **कुहेव मावशमितो नयातै** ॥ कुहेव कुत्रेव मा मां अवशं इतः अस्मात् स्थानात् नयातै नेष्यसि । किं च ॥

कुहेव ते चित्रतम*[*] प्रतिष्ठा ॥ स्पष्टम् । ईदृक्कष्टे कायवाङ्मनोनिर्निषेवितमीश्वरं स्मरति ॥ **कुहाचिदेष स्वपिता पिता नः†** ॥ एष मानसप्रत्यक्षो नः पिता ईश्वरः कुहाचित् कुत्र स्वपिता स्वपिति ॥ **यो न वेद न हृतं हरन्तम्** ॥ ५ ॥ यः हृतं मां न वेद न वा हरन्तं वेदेत्यन्वयः । किं चेतरे ऽप्याजन्मनिषेविता देवा न मत्सहाया इत्याह ॥ **प्रत्यङ्ङवाङ् प्राङ्ङितरौ च नेह** ॥ पञ्चसु दिक्षु तत्र तत्र वर्तमाना प्राणपञ्चकाधिष्ठातारो देवा लक्ष्यन्ते । इतरौ चेत्यन्तेषु । सर्वत्र सप्तम्यर्थो बोध्यः । वर्तमाना इति च शेषः । तेऽत्र देवा अपि किं नेह सन्ति । पक्षान्तरमाह ॥ **नाहमेनाननुपतस्थिरद्धा** ॥ एनान् ॥ देवान् अद्धा सत्येन अहं नोपतस्थिः नोपस्थाता इति न अपि तु उपस्थातैव । किं च ॥ **न मामिमे नूनमित्था पथो विदुः** ॥ नूनं निश्चितोऽयमर्थः । इमे देवाः मां इत्था इत्थंभूतं न विदुः ॥ **ये मा नयन्ति‡ मिथु चाकशानाः** ॥ ६ ॥ ये पथः मार्गात् मा मां न नयन्ति कीदृशाः (!) मिथु मिथः चाकशानाः भासमानाः । अतः परमिन्द्रस्य मेषवेषधारिणः प्रतिवचनमुपक्रमते ॥

परः स्मियानो अविवरस्य शूकम् ॥ परः इन्द्रः स्मियानो हसन् अस्य मेधातिथेः शूकं शङ्कां अविवः विवृतवान् ॥ **किं सीमिच्छरणं मन्यमानः** ॥ सीमिति निरर्थको निपातः । इत् प्रश्ने । किं शरणं रक्षकं मन्यमानः असीति शेषः । इत्थंभूतस्त्वं किं शरणं मन्यस इत्यर्थः । पुनरिन्द्र आह । **न ह त्वाहमप्रणीय स्वविष्ठामित्था जहामि शपमानमिन्नु** ॥ ७ ॥ हेत्यैतिह्यार्थः त्वा त्वां स्वविष्ठां स्वस्थानं अप्रणीय अप्रापय्य इत्था इत्थं भूतमज्ञानपङ्कनिमग्नं न जहामि शपमानमिन्नु शपमानमपि । तथा च त्वामज्ञानपङ्कादुद्धृत्य स्वस्थानमात्मस्वरूपं यावन्न प्रापयामि तावन्न त्वां मुञ्चामीति फलितो ऽर्थः । तदिच्छाधि यो असि

* चित्ततम, b. † नो, b. ‡ Read न यन्ति (Vṛtti wrong)?

सर्ववित्तम इत्यस्योत्तरमाह ॥ **अहमस्मि जरितॄणामु दावा** ॥ अहं उ इति निश्चये जरितॄणा यजमानानां जरिता वै यजमान इति श्रुतेः । दावा दाता फलस्येति शेषः । अस्मि भवामि । यागादिफलप्रदोऽहमेव ॥ **अहमाशिरं** ॥ सोमसंस्कारकं पयः तदप्यहमेव ॥ **अहमिदं दधग्वान्** ॥ इदं हविः दधग्वान् दाहकः । एतस्य हविषो दाहकश्चाहमेवेत्यर्थः । किं च ॥ **अहं विश्वा भुवना विचक्षन्नहं* देवानामासन्नवो ऽदः ॥ ८ ॥** विश्वा भुवनानि विश्वेषां भुवनानां विचक्षत् साक्षी सन्नहं देवानां आसन् आस्ये अवः अन्नाद्यं अदः ददामि । कुहेव ते चित्रतम प्रतिष्ठेत्यस्योत्तरमाह ॥ **मम प्रतिष्ठा भुव आण्डकोशाः** ॥ भुव उत्पादकस्य† मम आण्डकोशाः ब्रह्माण्डानि प्रतिष्ठा तत्सृष्ट्वेति श्रुतेः ॥ **विचेमि सं च हि नु यो विरश्पी** ॥ यो ऽहं व्येमि ॥ वियुक्तो भवामि समेमि संगतश्च भवामि संसारे ऽस्मिन् । विरश्पी विविधं रपति शब्दं करोतीति विरश्पी रपधातोः शिनिन् । शब्दवान् वेदप्रवक्तेति यावत् ॥ **अहं न्वाहिं पर्वते शिश्रियाणम्** ॥ नु इति निश्चये अहमेव नान्यः अहिं वृत्रासुरं पर्वते शिश्रियाणं पर्वताश्रितं अहनम् ॥ **उग्रो न्वहं तवसावस्युरद्धा ॥ ९ ॥** उग्रः क्रूरकर्मा नु निश्चितं अहमेव । तवसा वज्रेण अद्धा निश्चितं अवस्युः अन्नेच्छुः ऐश्वर्येच्छुरिति यावत् । सोऽप्यहमेव ॥ **प्रवक्षणा अभिदं पर्वतानाम्** ॥ प्रवक्षणा पक्षान् पर्वतानां अभिदं भेदितवानस्मि ॥ **यत्सीमिन्द्रो अकरोदनीकैः** ॥ यत् पुरुषसाध्यं कर्मेन्द्रः अनीकैः अकरोत्तत् अहमेवाकरवमिति वाक्यशेषः । सीमिति निरर्थको निपातः ॥ **को अद्धा वेद क इह प्रवोचत्** ॥ अद्धा सत्यं मम स्वरूपमिति शेषः । को वेद कः वेत्ता । को वा प्रवक्ता ॥ **को अश्वदभिमातिं विजघ्नुषः ॥ १० ॥** किं च अभिमातिं अरिसैन्यं विजघ्नुषः हतवतो मम मामित्यर्थः कः अश्नवत् कः अश्नोत् । मयि व्यापकतां कर्तुं न को

* Ex conj.; विचक्षन्नयं, MS.; विचक्षन्ननयं, b. † इत्यादकस्य, MS.

ऽपि समर्थ इत्यर्थः ॥ **को मे अवो दाशुषो विष्वगूतीरित्था ददृश्रे भुवनाधि विश्वा** ॥ अवो ऽन्नं दाशुषो दत्तवतः मे ऊतीः शक्तीः विश्वा भुवनान्यधि । अधिरीश्वर इति कर्मप्रवचनीयता । सर्वेषु भुवनेषु कः ददृश्रे कः ददर्श । किं च ॥ **रूपं रूपं जनुषा बोभवीमि** । जनुषा शरीरग्रहणेन रूपं रूपं अनेकरूपः बोभवीमि भवामि । शुद्धस्य तव कथं शरीरग्रहणमत आह ॥ **मायाभिरेको अभिचाकशानः ॥ ११ ॥** अनेकाभिर्विचित्रशक्तिभिर्मायाभिः एको ऽपि अभितः चाकशानः भासमानः मायाप्रतिबिंबित इति यावत् । किं च ॥ **विश्वं विचक्षे यमयन्नभीकः** ॥ अभीको निर्भयः विश्वं यमयन् । अन्तर्यामिस्वरूपेण अधितिष्ठन् । विचक्षे पश्यामि । किं च ॥ **नेशे मे कश्च महिमानमन्यः** ॥ महिमानं प्राप्तुमिति शेषः । स्पष्टम् । किं च ॥ **अहं द्यावापृथिवी आततानो बिभर्मि धर्ममवसे जनानाम् ॥ १२ ॥** द्यावापृथिवी आततानस्तन्वन्नहं जनानां अवसे जनानाम् अवितुं धर्मं महावीरं यज्ञशिरो* बिभर्मि । इदमुपलक्षणं । कर्ममार्गप्रवर्तनेनापि लोकरक्षक इति फलितोर्थः । आहुत्याप्यायते सोम इत्यादि स्मृतेः ॥ **अहमु ह प्रवर्तिं यज्ञियामियाम्** ॥ अहं उ इह यज्ञियां प्रवर्तिं यज्ञसंबन्धिनं काममहमियां† । कर्मफलप्रदो ऽप्यहमेवेति भावः ॥ **अहं वेद भुवनस्य नाभिं** । त्रैलोक्यवर्तिपदार्थमात्रं नाभिपदेन उपलक्ष्यते ॥ **आपिः पिता सूरहमस्य विष्वङ्** ॥ आपिः पितामहः पिता जनकः सूः माता अहमेव अस्य विश्वस्य । किं च ॥ **अहं दिव्या आन्तरिक्ष्या स्तुका वहे ॥ १३ ॥** दिव्या आन्तरिक्ष्याश्च तुकाः(!) बिन्दून् अहं वहामि । लकारव्यत्ययः अडागमाभावश्च छान्दसः । वृष्टिकर्ताप्यहमेवेत्यर्थः ॥ **अहं वेदानामुत‡ यज्ञानामहं छन्दसामविदं रयीणाम्** ॥ सर्वत्र कर्माणि षष्ठी । अविदं वेद्मि§ ॥ **अहं पचामि सरसः परस्य यदि-**

---

* यज्ञासिरो, MS. †काममहसियां, MS. ‡देवानामुत, b. §वेमि, MS.,

देतीव सरिरस्य मध्ये ॥ १४ ॥ परस्य सरसः समुद्रस्य मध्ये यत्। इडुदर्थे । उदेतीव । उदयं वडवानलस्वरूपेण उदयं प्राप्नोतीति यावत्। तत् वडवानलस्वरूपं तेजः अहमेव सन् सरिरस्य सलिलस्य कर्मणि षष्ठी सलिलमहमेव पचामि ॥ **अहमिन्नु परमो जातवेदा यमध्वर्यु-रभि लोकम्पृणैधीत्** ॥ अहमिन्नु परमः पवित्रतमो जातवेदाः अग्निः यं जातवेदसं अध्वर्युः अभि लोकम्पृणा लोकम्पृणामिष्टकामभि लक्षी-कृत्य अध्वर्युः ऐधीत् । समिद्धं चकार ॥ **यमन्वाह नभसो न पक्षी काष्ठा भिन्दन्* गोभिरितो ऽमुतश्च ॥ १५ ॥** यमध्वर्युमनुलक्षीकृत्य नभसो न पक्षी नभसः पक्षीव नकार इवार्थे गोभिर्वाग्भिः । इतः अमुतश्च काष्ठाः दिशं भिन्दन् अन्वाह शंसति । होतेति शेषः ॥ **अहमु यन्नपतता रथेन द्विषडारेण प्रधिनैकचक्रः** ॥ अहं उ । द्विषडारेण द्वादशारेण द्वादशमासात्मकेन संवत्सररूपेण अन्तरिक्षे ऽपि अपतता रथेन प्रधिना चक्रधारया उपलक्षितेन यन् गच्छन् यः सो ऽहमेवेत्यन्वयः† । कीदृशो ऽहं एकचक्रः । न खल्वन्यो ऽहमिव एकेन चक्रेण याति । एवं सूर्य-रूपेण प्रस्तूय चन्द्ररूपेण स्तौति । **अहमिन्नु दिद्युतानो दिवे दिवे तन्वं पुपुष्यानमृतं वहामि ॥ १६ ॥** अहमेव दिवे दिवे प्रतिदिनं तन्वं शरीरं पुपुष्यान् पोषयन् अमृतं वहामि प्रापयामि प्रजाभ्य इति शेषः । कीदृशः दिद्युतानः प्रकाशमानः । अथ वायुरूपेण स्तौति ॥ **अहं दिशः प्रदिश आदिशश्च विष्वक् पुनानः पर्येमि लोकम्** ॥ स्पष्टं । अथ पृथिवीरूपेण स्तौति ॥ **अहं विश्वा ओषधीर्गर्भ आधां याभिरिदं धिनुयुर्दाशुषः प्रजाः ॥ १७ ॥** विश्वाः सर्वाः ओषधीः अन्नानि । आधाम् दधे दाशुषः यजमानस्य प्रजाः याभिः ओषधीभिः इदं विश्वं धिनुयुः प्रीणयन्ति । अथ सकलजीवरूपतामाह ॥ **अहं चरामि भुवनस्य मध्ये पुनरुच्चावचं व्यश्नुवानः** ॥ उच्चावचं ऊर्ध्वमधश्च । आब्रह्मस्तंबपर्य-

---

* भिनंदन्, MS. † इत्यत्यन्वयः, MS.

ोवरूपो ऽहमेवेति भावः ॥ **यो मा वेद निहितं गुहा चित्स इदित्था**
ावीदाशयध्यै ॥ १८ ॥ यो मा मां गुहा गुहायामन्तःकरणे नि-
हृत्कमलान्तर्वर्तिनमेतदुक्तरूपाभेदेन वेद उपास्ते स इत्था इत्थं
ायध्यै आशायितुं आशयं कर्तुं बोभवीति भवति । इत्थमाश-
ब्रह्मज्ञानी मत्तुल्यो भवतीति यावत् । चिदिति निरर्थकं ॥ **अहं**
धा दशधा चैकधा च सहस्रधा नैकधा चासमत्र ॥ अत्र विश्व-
ा् शेषं स्पष्टम् ॥ **मया ततमितीदमश्नुते* तदन्यथासद्यादि मे**
ाद्विदुः ॥ १९ ॥ मया ततमिदं विश्वं इति । अमुं अमुं प्रकारं
ते प्राप्नोति । तत् तदेतत् मदुक्तं । अन्यथा असत् अन्यथा स्यात् ।
एवं के ऽपि ब्रूयुरिति शेषः । तर्हि ते असद्विदुः । स्पष्टम् ॥ **न मामश्नो-**
जरिता कश्चन† न माश्नोति परि गोभिराभिः ॥ कश्चित् जरिता
नानः । मां न अश्नोति न प्राप्नोति । न कर्मणा न प्रजया धनेनेति
। आभिर्गोभिर्वाग्भिः वेदैरिति यावत् । न मां परि अश्नोति । परि-
ोति । परीति सामस्त्यार्थे । तथा च नायमात्मा प्रवचनेन लभ्य इति
समानार्थमेतत् । **न मे ऽनाश्वानुत दाश्वानजग्रभीत्सर्व इन्मामुपय-**
विश्वतः ॥ २० ॥ मे मां कर्मणि षष्ठी । अनाश्वान् अनशनव्रती
ाजग्रभीत् न गृह्णाति । दाश्वान् दाता । दानानाशकयोरपि यज्ञेन दानेन
ा नाशकेनेतिश्रुत्यालोकप्राप्तिहेतुत्वस्यैवोक्तेः । न चाहमेकस्मि-
लोके नियतः । अतो ज्ञानिनः सर्व एव इदेवार्थे मां विश्वतः विश्व-
ानुपयन्ति उपगच्छन्ति ॥ **क शरारुः क सृमरः क नूरणः**
मिदं त्वत्त्वदितो वहामि ॥ शरारुः (sic) व्याघ्रादिः सृमरः वृकश्च
। कचित् प्रत्येकं उरणः मेषः सर्वमिदं त्वत् त्वत् त्वच्छब्दो
पर्यायः अन्यदन्यच्च इतः अनया दिशा अनेन सृष्टिप्रकारेण तासिलः
विभक्तिकत्वोक्तेः । वहामि । सर्वमपीति भावः । अतश्च पुनरप्याह ॥

---

* ततमितीतीदमश्नुते, MS. † कश्च, MS.

यन्मदिमे बिभ्यति तन्म एकम् ॥ यत् मत् मत्तः इमे व्याघ्रादयो बिभ्यति भयं प्राप्नुवन्ति । व्याघ्रादिभ्यो भूयांसो बिभ्यति । व्याघ्रादयोऽपि बहुभ्यो बिभ्यति । यस्माच्च व्याघ्रादयो बिभ्यति सोऽहमेव । तदेतदाह । तन्म एकं तत्सर्वमपि मे मम एकमेव । एवमैक्ये स्वस्य तदपेक्षया विशेषमाह ॥ **ते मे अक्षन्नहमु*ताननुक्षम्** ॥ २१ ॥ ते मे मां न अक्षन् न भक्षयन्ति । अदेर्घस्युपधालोपः† । उ इति अनर्थकं । अहमु तान् अनुक्षं भक्षयामि । अडागमाभावः छान्दसः ॥ **यत्तप्यथा बहुधा मे पुराचित्** ॥ यत् बहुधा मे मदर्थं पुरा पूर्वं तप्यथाः । तप्तवानसि । चिदित्यनर्थकम् ॥ **[तन्नु भुवे ऽहं उरणो बोभुवे]**‡ ॥ तत् तस्मादेव हेतोः नु निश्चयेन । भुवे भवाय सत्तायै ज्ञानेन तवैव सत्स्वस्वरूपावाप्तय इति यावत् । उरणो मेषः बोभुवे । अभवं । अतः परमुपसंहरन्नाह ॥ **ऋतस्य पन्थामसि हि प्रपन्नो ऽयसे स मे सत्यमिदेकमेहि**§ ॥ २२ ॥ अयसे प्राप्तये ब्रह्मण इति शेषः । ऋतस्य सत्यस्य पन्थां पन्थानं प्रपन्नो ऽसि स त्वं मे मम एकं सत्यमित् सत्यमेव न त्वन्यत्किमपि सांसारिकं ऐहिकं प्राप्नुहि । पुनः शुद्धं स्वस्वरूपमाह ॥ **अहं ज्योतिरहममृतं विनाद्धिः** । नद्धि बन्धनं तद्रहितं । स्पष्टं । स्वविवर्तत्वेन विश्वस्य स्वाभेदमाह ॥ **अहं जातं जनि जनिष्यमाणम्** ॥ जनि जायमानं । स्पष्टं । मेधातिथेः स्वाभेदमुपदर्शयन्नाह ॥ **अहं त्वमहमहं त्वमिन्नु त्वमहं चक्ष्व** । अहं त्वमेव । अहं दृश्यमानश्चेत् प्रतिबिम्बवत् त्वं । तर्हि कदाचिन्मम मिथ्याभूतत्वं प्रतिबिम्बवत्स्यादत आह । अहं चाहमेव । न प्रतिबिम्बवन्मिथ्याभूत इत्यर्थः । तर्हि तवैव प्रतिबिम्बवन्मिथ्याभूतत्वं कदाचित्स्यादत आह ॥ त्वमिन्नु त्वमहं चक्ष्व । त्वमपि त्वमेव अहं चेति चक्ष्व जानीहि ॥ **विचिकित्सीमं ऋज्वा** ॥ २३ ॥

---

* Sic (Vṛtti wrong). † Ex. conj.; अदिर्घैस्तु उपधालोपः, MS. ‡ Ex. conj.; text missing. § मीहि, MS.

ऋज्वा ऋजुः साम्प्रतं न तथा ऽपक्वकषायो ऽब्रह्मज्ञश्चेति **मा विचिकित्सीः** मा संशयं कार्षीः ॥ कुतः* सन्देहे सन् । मा इत्यत्र ऋत्यक इति ह्रस्वः ॥ **विश्वशास्ता विधरणो विश्वरूपो रुद्रः प्रणीती तमनः प्रजापतिः** ॥ विधरणः जगद्धारकत्वात् । प्रणीती जगत्प्रणेतृत्वादन्तर्यामिस्वरूपेणेति भावः । तमनः शमनः । यमस्वरूपत्वात् । स्पष्टम् ॥ **हंसो विशोको अजरः पुराणो ऋतीयमान अहमस्मि नाम ॥ २४ ॥** हंसो विवेचकत्वसामान्यात् ऋतीयमानत्वं सर्वत्र घृणावत्त्वेन निर्लेपत्वं । ऋतिः सौत्रो घृणार्थः प्रसिद्धः । ऋच्छतेरियर्तेर्वा ल्युट् । **अहमस्मि जरिता सर्वतोमुखः पर्यारणः परमेष्ठी नृचक्षाः** ॥ जरिता यजमान इति व्याख्यातं प्राक् । पर्यारणः व्यापकः । नृचक्षाः साक्षी ॥ **अहं विष्वङ्ङहमस्मि प्रसत्वानहमेको अस्मि यदिदं नु किं च ॥ २५ ॥** विष्वङ् व्यापकत्वात् । प्रसत्वान् साक्षी । स्पष्टम् ॥ इति बाष्कलमन्त्रोपनिषत् ॥

1982

---

* कितः, MS.

Q 12.4411 M
-D08.1

MADRAS:

PRINTED BY THE ORIENTAL PUBLISHING CO., LTD.

AT THEIR O. P. HOUSE, GEORGETOWN.